सुखदा आयुर्वेदग्रन्थमाला
द्वितीयं पुष्पम्

श्रीशालिनाथविरचिता

रसमञ्जरी

[मूलसंस्कृतसंहिता संशोधितपाठभेदपादसूचीसंवलिता]

परिष्कर्ता सम्पादकश्च
डॉ. नीलेश जोशी

॥ग्रन्थ एव गुरुः॥
eBook Publication Pvt. Ltd.®

॥ श्रीः ॥

सुखदा आयुर्वेदग्रन्थमाला
द्वितीयं पुष्पम्

श्रीशालिनाथविरचिता

रसमञ्जरी

[मूलसंस्कृतसंहिता संशोधितपाठभेदपादसूचीसंवलिता]

परिष्कर्ता सम्पादकश्च

डॉ. नीलेश जोशी

शास्त्री (व्याकरणम्), एम. ए. (संस्कृतम्), पी.एच.डी
वरिष्ठ-भाषाशास्त्रज्ञः, सं० वि० अ० विभागः, भा० प्रौ० सं० मुंबई
Senier Linguist, Dpt. of Computer Science and Engineering, IIT Bombay, Mumbai

॥ग्रन्थ एव गुरुः॥
eBook Publication Pvt. Ltd.®

प्रथमावृत्तिः, २०१९ ख्रिस्ताब्दम्

रसमञ्जरी

मूलसंस्कृतसंहिता संशोधितपाठभेदपादसूचीसंवलिता

संपादकः डॉ. नीलेश जोशी,

वरिष्ठ-भाषाशास्त्रज्ञ, IIT मुंबई, पवई, महाराष्ट्र ४०००७६

प्रथमावृत्तिः महाशिवरात्री, ४ मार्च २०१९

मुखपृष्ठरचना :

श्री. वासुदेवः अहितालः ।

प्रकाशकः

eBook Publication Pvt. Ltd.®

4/47, उदय को. हौ. सोसायटी,

आरे रोड, गोरेगाव पश्चिम,

मुंबई, महाराष्ट्र, भारत, ४०००६२

Telephone: +91 7038164022

Email: publicationebook@gmail.com

Website: https://archive.org/details/@ebook_publcation

© **सर्वाधिकाराः सम्पादकाधीनाः ।**

eBook Terms & Conditions

1. This eBook* may be

a. Distributed without modification.

b. Copied for personal and educational use.

c. Printed for personal and educational use.

2. This eBook* may NOT be

a. Sold individually or as part of package.

b. Modified in any way.

c. Reversed-engineered.

This eBook* and all its content including images are Copyright © 2019 Dr. Nilesh Joshi- All rights reserved.

***eBook refers to this PDF and any of its content including pages and images in either electronic or printed form.**

सङ्केताभिज्ञानम्

अमर.	अमरकोशः
आयु.प्र.	आयुर्वेदप्रकाशः
च.सू.	चरकसंहिता-सूत्रस्थानम्
धा.पा.	पाणिनीय-धातुपाठः
पा.सू.	पाणिनीयसूत्रम्
भा.प्र.पू.मिश्र.	भावप्रकाश-पूर्वखण्ड-मिश्रप्रकरणम्
भा.भै.रत्ना.	भारत-भैषज्य-रत्नाकरः
मेदि.	मेदिनीकोशः
र.अ.	रसार्णवः
र.म.	रसमञ्जरी
र.रत्न.स.	रसरत्नसमुच्चयः
र.रत्ना.	रसरत्नाकरः
र.सा.सं.	रसेन्द्रसारसंग्रहः
रस.चि.	रसेन्द्रचिन्तामणिः
रस.दर्श.खं.	रसेश्वरदर्शन-खण्डः
रा.नि.	राजनिघण्टुः
वाच.	वाचस्पत्यम्
सु. उ.	सुश्रुतसंहिता-उत्तरतन्त्रम्
सु.क.	सुश्रुतसंहिता-कल्पस्थानम्
सु.चि.	सुश्रुतसंहिता-चिकित्सास्थानम्
सु.सू.	सुश्रुतसंहिता-सूत्रस्थानम्

सम्पादकीयम्

हरति सकलरोगान्मूर्छितो यो नराणां

वितरति किल बद्धः खेचरत्वं जवेन ।

सकलसुरमुनीन्द्रैर्वन्दितं शम्भुबीजं

स जयति भवसिन्धोः पारदः पारदोऽयम् ॥ र.म.१.५ ॥

रसशास्त्रे पारदस्य माहात्म्यवर्णनप्रसङ्गे रसमञ्जर्यां प्रतिपादितमिदम् | भवसिन्धुपारणात् पारदोयमिति | यथा रसेश्वरदर्शने-

रसस्य पारदत्वं संसारपरपारप्रापणहेतुत्वेन ।

तदुक्तम् -

संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः ॥ र.रत्ना.३.१.६॥

यथाष्टाङ्गायुर्वेदस्य प्रवर्तको ब्रह्मा समुल्लिखितः खलु तद्यथा-

सा दैवी प्रथमा सुसंस्कृतरसैर्या निर्मिता स्याद्रसैः

चूर्ण-स्नेह-कषाय-लेह-रचिता स्यान्मानवी मध्यमा।

शस्त्रच्छेदन लास्यलक्षणकृता चाराधना साऽसुरी

त्यायुर्वेदरहस्यमेतदखिलं लिखश्चिकित्सा मता।।(रसपद्धति)

तथा च रसशास्त्रस्य रसविद्याया वा प्रवर्तकस्त्वादिदेवो महायोगेश्वरो भगवान् शिवः | महादेवस्य शङ्करस्य प्रत्यङ्गसंभवादयं रस इति रसार्णवे प्रतिपादितम् तद्यथा-

त्वं माता सर्वभूतानां पिता चाहं सनातनः ।

द्वयोश्च यो रसो देवि महामैथुनसम्भवः ॥ र.अ.१.३४ ॥

स्वैरतः सम्भवाद्देवि पारदः कीर्तितो महः ।

पारदो गदितो यश्च परार्थं साधकोत्तमैः ॥ र.अ.१.३५ ॥

सूतोऽयं मत्समो देवि मम प्रत्यङ्गसम्भवः ।

मम देहरसो यस्मात्रसस्तेनायमुच्यते ॥ र.अ.१.३६ ॥

तथा च रसरत्नसमुच्चयकारेण रसविद्या शिवेनोक्तेति प्रतिपादिता तद्यथा-

रसविद्या शिवेनोक्ता दातव्या साधकाय वै ॥ र.रत्न.स.६.२७ ॥

ततोऽस्या रसविद्यायः रसचिकित्सायास्तन्त्रकारा रसेश्वरदर्शनकारेण सायणमाधवाचार्येण चतुर्विधा विभाजितास्ते यथा-

देवाः केचिन् महेशाद्या दैत्याः काव्यपुरःसराः ।

मुनयो वालखिल्याद्या नृपाः सोमेश्वरादयः ॥

गोविन्दभगवत्पादाचार्यो गोविन्दनायकः ।

चर्वटिः कपिलो व्यालिः कापालिः कन्दलायनः ।।

एतेऽन्ये बहवः सिद्धा जीवन्मुक्ताश्चरन्ति हि।

तनुं रसमयीं प्राप्य तदात्मककथाचणाः ॥रस.दर्श.खं.१२,१३-१४॥

एतेषु यथाभागम्

१. रससिद्धाः देवाः - महेश्वरः आदयः |

२. रससिद्धाः दैत्याः - शुक्राचार्यः आदयः |

३. रससिद्धाः मुनयः - वसिष्ठ-कपिल-वाल्यखिल्याः आदयः |

४. रससिद्धाः मानवाः - नृपसोमेश्वरः नागार्जुनः आदयः |

तथा च **गोविन्दभगवत्पादाचार्यो गोविन्दनायकः चर्वटिः कपिलो व्यालिः कापालि: कन्दलायनः** आदयो रससिद्धाः परिगणिताः ननु |

रसतन्त्रेषु च रसेन्द्रसंहिता-दत्तात्रेयसंहिता-अगस्त्यसंहिता-गोरक्षसंहिता-रुद्रयामलतन्त्र-महारसायनतन्त्र-रसरत्नाकर-रसार्णव-रसरत्नसमुच्चय-रसरत्नहृदय-रसमञ्जरी-रसरत्नप्रदीप-रसप्रकाशसुधाकर-रससुधाकर- रसचण्डाशु-रसपारिजातकप्रभृतयोसंख्या रसग्रन्थाः श्रूयन्ते |

तेषु ग्रन्थेषु रसमञ्जरी नाम्ना प्रसिद्धरसशास्त्रीयग्रन्थः श्रीशालिनाथेन विरचितः सोऽयमुपलब्धहस्तलिखितैर्मुद्रितपुस्तकैः परिष्कृत्य संशोध्य च पाठभेदैः सह प्रकाशनप्रपञ्च आरभ्यते |

स्वीकृतहस्तलिखितानि तथोपलब्धपूर्वप्रकाशितपुस्तकानि

अ- संज्ञितम्- हस्तलिखितम् धर्मार्थ-ट्रस्ट रघुनाथमन्दिरम्, जम्मू, जम्मू-काश्मीर,८५ पृष्ठानि, लेखनकालो नोपलभ्यते | तथापि शतत्रयं वर्षं पुरातनम् |

ब- संज्ञितम्- हस्तलिखितम्, श्रीसमर्थ-वाग्देवता-मन्दिरम्, धुले, महाराष्ट्रराज्यम्, ग्रन्थसंख्या.३५७ | इदं तु शतवर्षं पुरातनमिति |

क- संज्ञितम्- अत्र प्रकाशितग्रन्थानां सङ्घातः स एवम्-

१. रसमञ्जरी, जॉर्ज-ऑगस्ट-विश्वविद्यालयः,गोटेङ्गन-जर्मनीराष्ट्रम्, रसशास्त्रविभागेन प्रकाशितग्रन्थः |[1]

२. रसमञ्जरी, संस्कृतविकिस्रोतः-आयुर्वेदान्तर्गतः उपलब्धः ग्रन्थः|[2]

३. Sanskritworld[3] यांच्या Ayurved, alchemy विभागे, Rasavidyā, Computer-based analysis of Indian alchemy[4] जर्मनीस्थसंस्थाप्रकाशितग्रन्थः |

ख- संज्ञितम्- रसमञ्जरी-वैद्यक, मुखियाजी-रघुनाथजी-

---

[1] http://gretil.sub.uni-goettingen.de/gretil.html

[2] https://sa.wikisource.org/wiki/वर्गः:आयुर्वेदः

[3] https://www.sanskritworld.in/index/detailview/book_id/rasarnava

[4] http://www.sanskritreader.de/rasavidya/index.php?contents=texte&lng=en

श्रीकृष्णलालकृत-भाषाटीकासहिता,खेमराज-श्रीकृष्णदासेन प्रकाशिता, मुम्बई, ख्रिस्ताब्दम् १९६८ |

ग- संज्ञितम्- रसमञ्जरी, आचार्य-सिद्धिनन्दनमिश्रकृता सिद्धिप्रदा नाम-हिन्दीव्याख्यासहिता, चौखम्भा ओरियन्टालिया, वाराणसी, ख्रिस्ताब्दम् १९९५ |

एवमुपलब्धहस्तलिखितानि प्रकाशितग्रन्थान् संचित्य साकल्येन संशोध्य च समुचितपाठान् निश्चित्य भारतीयभिषजां करकमलेषु ननूपायनीक्रियते |

सङ्कलितपुस्तकसमन्वयत्वम्

सङ्कलितपुस्तकानां सर्वेषामेतेषां समन्वयत्वमपि दृश्यते तद्यथा-

अ-संज्ञितं ब-संज्ञितं द्वेऽपि हस्तलिखितपुस्तके परस्परं समन्वयतां दधाते खलु | तथा च ख-संज्ञितेनापि संबद्धम् | क-संज्ञितः संघातः पूर्णतया ग- संज्ञितेनापि संबद्धः | अपि तु ख-ग-मध्ये विभिन्नेषु स्थानेषु अतीव भिन्नता विलक्ष्यते सा पाठभेदरूपेण दर्शिता | ख-ग-प्रकाशितग्रन्थाः बहुशः हस्तलिखितपुस्तकाभ्यां समन्विताः | अन्यच्च क-संज्ञित-सङ्घाते तिस्रोऽप्यावृत्तयः परस्परमन्विताः पूर्णतया |

वस्तुतः एतेषां पादसंदर्भः कोशरूपेण स्वतन्त्रतया प्रकाश्यते प्रस्तुतग्रन्थस्य विस्तारभयात् | तस्मादत्र नोल्लिखितः |

विवेचनीयाः पाठाः

स्थाने स्थाने अ-ब-हस्तलिखितयोरन्यप्रकाशितग्रन्थेषूपलब्धा पाठाः पाठभेदाश्च निर्दिष्टाः अपि त्वत्र तेषु केचन पाठाः विवेचनीयाः यथा सदोषपाठाः विभिन्नपाठाः संदिग्धपाठा अधिकतरपाठाः दृश्यन्ते ये सर्वे ग्रन्थस्यास्याध्ययने नितरां महत्त्वमादधते | पाठैरेतैरर्थदृष्ट्या महदन्तरं लक्ष्यते तस्मात्ते विवेचनीया मननीयाश्चिन्तनीयाश्च |

सदोषपाठाः

समग्रग्रन्थेषु ६३ अपपाठाः दृश्यन्ते | एते पाठाः मुद्रितग्रन्थेभ्यो जालपुटे प्रकाशितग्रन्थेभ्यः संकलिताः | तेषु अधिकतराः पाठाः व्याकरणदोषयुक्ताः अपाणिनीयरूपप्रयोगादसाधुत्वमापद्यते | ते यथा-

अ.क्र.	**पाठाः**	**ग्रन्थसंक्षेपः**	**संदर्भक्रमः**
1	बिन्दुः	ग	१.१
2	भव पारदाय	ग	१.२
3	प्रबंधानारम्भते	ग	१.५
4	गृहीतुम्	क, ग	१.१०
5	मला ह्येते	क,ग	१.१७
6	कुप्यां	ख	२.२२
7	काचकुप्यां	ख	२.२४
8	अधस्थं	क,ग	२.२७
9	काचकुप्यां	क,ग	२.२८

10	च्छुद्धः	क,ग	२.४१
11	साधितोयः	ख	२.५७
12	विंद्यात्	ख	२.५८
13	कौद्रव	ख	३.२३
14	कोलत्थे	ख	३.२३
15	अष्टास्र चाष्टफलकः	ग	३.३१
16	कुर्यादुदरं	ख	३.३६
17	नाम	क, ग	३.४८
18	संदेहो	ख	३.४७
19	क्षीरमध्वाज्य	ग	३.६७
20	भेदी	क, ग	३.७८
21	सोभाञ्जन	ख	३.७४
22	दोलका	क	३.८७
23	मृताशिनि	क	४.२१
24	र र	ख	४.२८
25	तक्र	ख	५.२
26	निषेचेत्तु	क, ग	५.२
27	जारयेतारं	ख	५.२१
28	त्रिफलादष्टगुणे	क	५.५०
29	लिपेत्	अ,ब,क,ख,ग	६.४८
30	एकाहिकं	ख	६.६५
31	कुपिकां	अ,ब,क,ख,ग	६.६८,७०
32	जेपाला	ख	६.९१

33	द्विगुणो	ख	६.११८
34	भागो	ख	६.११८
35	एकाहिकं	ख	६.१३८
36	लिह्येत्	अ,क,ग	६.१६३
		ब,ख	६.१५६
37	काचकुप्यां	क, ग	६.१८६
38	कोह्लबीजकम्	ख	६.२१८
39	तिन्दुकाम्	ख	६.२२६
40	झागीक्षीरं	ख	६.२४५
41	दीपाग्ना	क, ग	६.२५०
42	बिड	क	७.१८
43	गन्धकःपेतं	क	८.५
44	तर्द्धेन	ग	८.८
45	नासिनी	ख	८.१२
46	संपिष्ट्वा	अ,ब,क,ख,ग	८.१५
47	सजपा कुसुमैः	ग	८.२६
48	नरकौधम्	ग	८.२६
49	शुण्ठी क्वाथः	ख	९.१०
50	सप्ताभिः	ग	९.३०
51	गर्मं	ग	९.४२
52	सौभञ्जनक	ख	९.५६
53	सुराचिर्तम्	ग	९.५२
54	लभेत्	अ,ब,ख	९.५७

		क, ग	९.५४
55	शतवीरा	ख	९.६२
56	दुग्धया	ख	९.६४
57	शालितण्डुलदुग्ध कम्	ग	९.५७
58	गात्र माटेन मित्यादि	ग	९.७९
59	दिशिमाश्रित्य	क, ग	९.९२
60	दिशः	क, ग	९.९४
61	दिशिमाश्रित्य	क, ग	९.९९
62	स्त्रैला	ग	१०.४
63	यक्षराक्षसाम्	ग	१०.१५
64	हीनायुधो	क	१०.२४
65	प्रश्यति	ग	१०.२७

एतेषु केचन पाठाः विवेचनीयाः तद्यथा -

१. भव पारदाय || ग.१.२ ||

रसमञ्जर्याः शारदास्तवने प्रस्तुतपाठः प्रयोज्यते ग-संज्ञितग्रन्थे | अत्र व्याकरणदृष्ट्या दोषः | मूलश्लोकः यथा -

इन्दीवरी भवति यच्चचरणारविन्द-

द्वन्द्वे पुरन्दरपुरस्सर देवतानाम् ।

वन्दारुतां कलयतां सुकिरीटकोटिः

श्रीशारदा भवतु सा भव पारदाय ॥ ग. १.२ ॥

भव - इतीदं भू सत्तायाम् (धा.पा.१.१) भ्वादिगणस्थधातोर्लोट्लकारस्य मधमपुरुषस्यैकवचनम् | ततः इदं तिङन्तपदम् | अपि तु वाक्येस्मिन् श्रीशारदापदं कर्तृपदं तस्य प्रथमपुरुषत्वान्मध्यमपुरुषत्वं नोपपद्यते |

अतः भव नामपदं यदि स्यात्तर्हि तदर्था-

१. **शिवः -व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः | अमर. 1.1.34.2.2 ||**
२. **जननम्- दवदावौ वनारण्यवह्नी जन्महरौ भवौ | अमर.3.3.206.7.3 ||**
३. **१ महादेवे २ जन्मनि ३ उत्पत्तौ ४ प्राप्तौ || वाच.pg.४६४५ ||**
४. **संसारे || मेदि० ।**
५. **फले न० || रा.नि. ।**

अतः भव नाम संसारः यदि स्यात् तस्य पारदाय परमपारं गन्तुं श्रीशारदा देवी भवतु इत्याशयः | अपि तु भवपारदाय इति सामासिकपदमपेक्ष्यते न तु व्यस्तम् | तस्मादिदं भव पारदाय एवं व्यस्तपदमनुचितम् |

भवपारदाय इति समस्तपदमप्युपलभ्यते -

श्रीशारदा भवतु सा भवपारदाय ॥ क. १.२ ॥

तथा च अ-ब-संज्ञितयोर्हस्तलिखितयोः -

श्रीशारदा भवतु सा भवपारदा वः ॥ अ-ब. १.२ ॥

अत्र तु भवपारदा विशेषणं श्रीशारदा-विशेष्यस्य | संसारपारणहेतुत्वाच्छारदेति विलसति पाठोऽयम् |

२. कौद्रव || ख.३.२३ ||

वज्रशोधनविधिकथनप्रसङ्गे ख-संज्ञितपुस्तके पाठोऽयं समुपलब्धः-

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितम् ।

सप्ताहं कौद्रवक्वाथे कोलत्थे विमलं भवेत् ॥ ख. ३.२३ ॥

ततो अत्र कौद्रवक्वाथे शब्दप्रयोगो वर्तते | कौद्रव इति शब्दकोशे नोपलभ्यते | शब्दस्तु कोद्रव इति वर्तते यथा-

१. **कोद्रव, m, a species of grain eaten by the poor (Paspalum scrobiculatum[5]),[MW.][6]**

सुश्रुते[7] सूत्रस्थाने अन्नपानविधौ समुल्लिखितम्-

कषायमधुरस्तेषां शीतः पित्तापहः स्मृतः |

कोद्रवश्च सनीवारः श्यामाकश्च सशान्तनुः || सु.सू.४६.२३ ||

---

[5] (C.P.Khare, 2007),pg.467

[6] (MONIER-WILLIAMS, 1899),pg.३१३

[7] (सुश्रुत, 2010)

अपि च चिकित्सास्थाने विसर्पनाडीस्तनरोगचिकित्सायाम् -

धत्तूरजं मदनकोद्रवजं च बीजं

कोशातकी शुकनसा मृगभोजिनी च ।

अङ्कोटबीजकुसुमं गतिषु प्रयोज्यं

लाक्षोदकाहृतमलासु विकृत्य चूर्णम् ।। सु.चि.१७.३७।।

तथा च क्षुद्ररोगचिकित्सायाम्-

अवपीडं शिरोबस्तिमभ्यङ्गं च प्रयोजयेत् ।

क्षालने कोद्रवतृणक्षारतोयं प्रशस्यते ।। सु.चि.२०.३०।।

कल्पस्थाने कीटकल्पे अपि

धूमो हन्ति प्रयुक्तस्तु शीघ्रं वृश्चिकजं विषम् ।

कुसुम्भपुष्पं रजनी निशा वा कोद्रवं तृणम् ।। सु.क.८.७३ ।।

तथा च भावप्रकाशनिघण्टौ –

कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः ।

कोद्रवो वातलो ग्राही हिमपित्तकफापहः ।

उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम् ॥

॥ भा.प्र.पू.मिश्र.९.६८॥

ततो अनेन सिध्यते यत् कौद्रवः नात्र साधुपाठस्तत्र कोद्रव इत्यपेक्ष्यते |

3. कोलत्थे || ख.३.२३ ||

वज्रशोधनविधिकथनप्रसङ्ग एव कोद्रवक्वाथे कोलत्थक्वाथे वा हीरकं मज्जेदिति सति ख-संज्ञितपुस्तके पाठोऽयं समुपलब्धः-

सप्ताहं कौद्रवक्वाथे कोलत्थे विमलं भवेत् ॥ ख. ३.२३ ॥

अत्र कोलत्थ अयमपपाठः | शब्दकोशे कौलत्थ इति दृश्यते तद्यथा-

१. **कौलत्थ त्रि० कुलत्थेन संस्कृतम् |[8] ततः तेन संस्कृतम् || पासू. ४.४.२-३|| अण् प्रत्ययो भवति |**
२. **कौलत्थ a mf(ई Pāṇ. 4-4, 4)n. (fr. कुल्°), made or prepared with Dolichos uniflorus,[MW.][9]**
३. **Atylosia scarabaeoides[10]**

कुलत्थसंस्कृते यथा सुश्रुतेन चिकित्सास्थाने भगन्दरचिकित्सायाम्-

कटुत्रिकं वचाहिङ्गुलवणान्यथ दीप्यकम् |

पाययेच्चाम्लकौलत्थसुरासौवीरकादिभिः ||सु. चि. ८ .३८||

---

[8] वाच.pg.२२७८

[9] (MONIER-WILLIAMS, 1899),pg.३१७

[10] (C.P.Khare, 2007),pg.82, The Journal of the Linnean Society. [v.28 (1891)]: Page 48

कल्पस्थाने सर्पदष्टविषचिकित्सितकल्पे विषे कानपि द्रवान् निरस्यन्नाह-

न पिबेत्तैलकौलत्थमद्यसौवीरकाणि च ||सु. क. ५ .१८||

उत्तरतन्त्रे शिरोरोगप्रतिषेधे आहारमाह -

पटोलमुद्गकौलत्थैर्मात्रावद्भोजयेद्रसैः ||सु. उ. २६ .२३||

अत्र पटोलादीनां यूषैः सह मात्रावद्भोजयेदिति | ततः स्पष्टमिदं यदत्र कौलत्थे इति समीचीनं रूपम् |

४. सोभाञ्जन || ख.३.७४ ||

तृतीयाध्याये कान्तपाषाणशोधने सोभाञ्जन-पदस्य प्रयोगः कृतस्तद्यथा-

लवणानि तथा क्षारौ सोभाञ्जनरसे क्षिपेत् ।

अम्लवर्गयुते चादौ दिनमर्धं विभावयेत् ॥ ख.३.७४ ॥

अत्र वर्णविभिन्नत्वं दृश्यते | शकारस्य सकारः | सोभञ्जन शब्दो नास्ति तु तत्र शोभाञ्जन वर्तते शब्दकोशे यथा-

१. शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः | अमर. वनौषधिवर्गः 2.4.31.1.1||
२. Moringa Pterygosperma[11] Its leaves, flowers and root are edible and are medicinally [MW.][12],

---

[11] (C.P.Khare, 2007),pg.४२५

[12] (MONIER-WILLIAMS, 1899),pg.1092]

३. शोभाञ्जन पु० शोभायै अज्यते अनेनेति अन्जूँ व्यक्तिम्रक्षणकान्तिगतिषु (to anoint, to polish, to smear) [धा.पा.७.२१] रुधादिगणस्थधातोः ल्युट् च् || पा.सू. ३.३.११५ अनेन सूत्रेण कर्मणि ल्युट् प्रत्ययो भवति |

भावप्रकाशे गुडूच्यादिवर्गे निरूप्यते तद्यथा-

शोभाञ्जनः शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः |

तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः ||९१||

शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः |

दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् |

संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः ||९२||

चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् |

मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान्हरेत् ||९३||

श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत् |

प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् ||९४||

मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः |

शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् ||९५||

चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् |

अवृष्यं कफवातघ्नं तन्नस्येन शिरोऽर्तिनुत् ||

|| भा. प्र. पू. मिश्र. ४.९१-९६ ||

तथा च सुश्रुतेन चिकित्सास्थाने अश्मरीचिकित्सायाम् कथ्यते-

सहैडकाख्यौ पेयौ वा शोभाञ्जनकमार्कवौ ||सु. चि. ७.२४||

अपि चोदरचिकित्सायां च-

प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुक्तवतो वामबाहौ कूर्पराभ्यन्तरतः सिरां विध्येत्, विमर्दयेच्च पाणिना प्लीहानं रुधिरस्यन्दनार्थं; ततः संशुद्धदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत, हिङ्गुसौवर्चिके वा क्षीरेण, स्रुतेन पलाशक्षारेण वा यवक्षारं, किंशुकक्षारोदकेन वा बहुशः स्रुतेन यवक्षारं, पारिजातकेक्षुरकापामार्गक्षारं वा, तैलसंसृष्टं शोभाञ्जनकयूषं पिप्पलीसैन्धवचित्रकयुक्तं, पूतिकरञ्जक्षारं वाऽम्लस्रुतं विड्लवणपिप्पलीप्रगाढम् || सु.चि.१४.१३ ||

ततोनेन स्पष्टं भवति तत्र सोभञ्जन इति सदोषः पाठः शोभञ्जन इत्यपेक्ष्यते |

५. मृताशिनि || क.४.२१ ||

विषप्रयोगे पथ्यमनुपानं च कथनप्रसङ्गे कसंज्ञिते पुस्तके पाठोयं समुपलभ्यते-

ददेद्वै सर्वरोगेषु मृताशिनि हिताशिनि ।

क्षीराशनं प्रयोक्तव्यं रसायनरते नरे ॥ क.४.२१ ॥

अत्र सर्वरोगेषु रसायनरते नरे हितं स्वरूपं मृतं क्षीराशनं प्रयोक्तव्यमिति न साधु | तस्मादन्यत्र ग्रन्थान्तरेषु अब-हस्तलिखितपुस्तकयोर्मध्ये-

ददेद्वै सर्वरोगेषु घृताशिनि हिताशिनि ।

क्षीराशनं प्रयोक्तव्यं रसायनरते नरे ॥ अ-ब.४.२१ ॥

अत्र घृताशिनीति पाठः उपलभ्यते | अपि ख-संज्ञिते ग्रन्थे-

ददेद्वै सर्वरोगेषु घृताशिनि हिताशिनि ।

क्षीराशनं प्रयोक्तव्यं रसायनरते नरे ॥ ख.४.२१ ॥

तथा च ग-संज्ञिते ग्रन्थेऽपि -

ददेद्वै सर्वरोगेषु घृताशिनि हिताशिनि || ग.४.२१ ||

घृताशिनि पुष्ट्यर्थं आयुर्वेदप्रकाशे अपि कथ्यते-

दातव्यं सर्वरोगेषु घृताशिनि हिताशिनि ॥

क्षीराशिनि प्रयोक्तव्यं रसायनरते नरे || आयु.प्र.१४.६३-६४ ||

तथा च रसेन्द्रचिन्तामणौ -

दातव्यं सर्वरोगेषु घृताशिनि हिताशिनि ॥ रस.चि.७.३५ ||

ततः स्पष्टमिदमत्र मृताशिनि स्थाने घृताशिनीत्यपेक्ष्यते | ततः सर्वरोगेषु रसायनरते नरे गोघृतं गोदुग्धं प्रयोक्तव्यमिति |

६.जेपाला || ख.६.९१ ||

संनिपातभैरवरसवर्णने घटकद्रव्येषु ख-संज्ञिते ग्रन्थे पाठोऽयं दृश्यते तद्यथा-

ताम्रगन्धरसश्वेतस्पन्दामरिचपूतनाः ।

समीनपित्तजेपालास्तुल्या एकत्र मर्दिताः ॥ ख.६.९१ ॥

अत्र जेपाला इति पाठः विद्यते | वस्तुतः शब्दकोशे तु जैपालः इति दृश्यते-

१. **जैपाल पु० जयपाल + पृषोदरादीनि यथोपदिष्टम्|| पा.सू.६.३.१०९ इत्यनेन सूत्रेण यकारलोपे ऐकारत्वं च सिद्ध्यते| । जयपालवृक्षे द्विरूपकोषः |**[13]

२. **जयपालः , पुं, (जयं पालयतीति । पालि +"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विधिः । विष्णुः । भूपालः । इति शब्दरत्नावली ॥ वृक्षविशेषः । जमाल्गोटा इति भाषा । तत्पर्य्यायः । सारकः २ रेचकः ३ तिन्तिडीफलम् ४ दन्तीबीजम् ५ मलद्रावि ६ बाजरेचनम् ७ कुम्भी-बीजम् ८ कुम्भिनीबीजम् ९ घण्टावीजम् १०घण्टिनीबीजम् ११ निकुम्भाख्यबीजम् १२ शोधनीबीजम् १३ चक्रदन्तीबीजम् १४]**[14]

[13] (Bhat̲t̲ācārya, (1962).)pg.३१४५

[14] (Vasu & Vasu, 1808-1814 Saka era, (1866-)),pg.516

३. **जैपाल** **irregular form for जयपाल, Croton [MW.]**[15]

४. **Croton Tiglium [Linn.]**[16]

राजनिघण्टौ पिप्पल्यादिवर्गे निर्दिश्यते -

भार्गी पुष्करमूलञ्च शृङ्ग्यथो दन्तिकाद्वयम् ।

जैपालश्च त्रिवृद्द्वेधा त्वक् पत्रं नागकेशरम् ||रा.नि.६.६ ||

तथा च गुणवर्णने-

जैपालः कटुरुष्णश्च कृमिहारी विरेचनः ।

दीपनः कफवातघ्नो जठरामयशोधनः || रा.नि.६.१६७||

अन्यत्र ग्रन्थान्तरेषु जैपाल इति पाठ उपलब्धः तद्यथा-

ताम्रगन्धरसश्वेतस्पन्दामरिचपूतनाः ।

समीनपित्तजैपालास्तुल्या एकत्र मर्दिताः ॥ अ.ब.क.ग.६.९१ ॥

ततोत्र जेपाल स्थाने जैपाल इति योजनीयम् ।

७. **कोह्लबीजकम्|| ख.६.२१८ ||**

मेहवज्ररसनिर्मितिप्रक्रियायां ख-संज्ञिते ग्रन्थे **कोह्लबीजकम्** इत्ययं पाठो दृश्यते-

---

[15] (MONIER-WILLIAMS, 1899),pg.४२५

[16] (C.P.Khare, 2007),pg.189

भस्म सूतं मृतं कान्तं शुल्बभस्म शिलाजतु ।

शुद्धताप्यं शिला व्योषं त्रिफलाकोह्लबीजकम् ॥ ख.६.२१७ ॥

अत्र कोह्लबीजकमिति पाठः | कोह्ल नाम्ना काचन वनस्पतिर्न विद्यते | कोल नामका वनस्पतिः वर्तते-

१. **Name of a plant (= चित्र, चित्रक) [MW][17]**
२. **कोल n. the fruit of the jujube [MW][18]**

भावप्रकाशे आम्रादिफलवर्गे दृश्यते-

पुंसि स्त्रियाञ्च कर्कन्धूर्बदरी कोलमित्यपि ||

|| भा.प्र.पू.मिश्र.७.६०||

सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ||भा.प्र.पू.मिश्र.७.६२||

किन्तु अन्यत्र हस्तलिखितपुस्तकेषु प्रकाशितग्रन्थेषु कोह्लबीजकम् स्थाने अङ्कोलबीजकम् इति पाठो दृश्यते -

भस्म सूतं मृतं कान्तं शुल्बभस्म शिलाजतु ।

शुद्धताप्यं शिला व्योषं त्रिफलाङ्कोलबीजकम् ॥अ.ब.क.ग.६.२१७ ॥

---

[17] (MONIER-WILLIAMS, 1899),pg.313
[18] ibid.pg.313

अङ्कोल नाम the plant Alangium Hexapetalum [MW][19] वा Alangium begoniaefolium(Roxb.) Baill[20] इति शास्त्रीयवानस्पत्यनामधेयम् |

तथा च रसेन्द्रसारसंग्रहे प्रमेहचिकित्सायां कथ्यते-

भस्म सूतं मृतं कान्तं लोहभस्म शिलाजतु ।

शुद्धताप्यं शिलाव्योषं त्रिफला बिल्वजीरकम् || र.सा.सं.२.४४ ||

अत्र त्रिफला बिल्वजीरकम् स्थाने नरेन्द्रनाथेन पाठान्तरेषु त्रिफलाङ्कोलबीजकम् इति पाठः प्रस्तूयते |[21]

तथा च भारतभैषज्यरत्नाकरे

भस्मसूतं मृतं कान्तं लोहभस्म शिलाजतु ।

शुद्धं ताप्यं शिला व्योषं त्रिफलाङ्कोलबीजकम् ||

||भा.भै.रत्ना.३.४४६४ ||[22]

अत्र अबकग-पाठैः समन्वितः पाठोयम् | ततः कोह्ल इति रूपं समीचीनं नास्ति तत्र कोलबीजकम् इत्यपेक्ष्यते | ततोऽपि कोलः नाम बदरीत्यर्थः

---

19 Ibid.pg.7

20 (C.P.Khare, 2007),pg.38

21 (नरेन्द्रनाथ, २००७), pg.५०१

22 (Nagindas Chaganlal Shah, 1928), pg.५१९

भावप्रकाशे निर्दिष्टत्वात् | बेर जीरा इति पाठान्तरदर्शनादिति भारतभैषज्यरत्नाकरभाष्यात्सिद्धम् |[23]

८. शतवीरा || ख.९.५६ ||

नवमाध्याये वन्ध्यात्वनिवारणे गर्भप्रदयोगे वा सौभञ्जनक इति ख-संज्ञिते ग्रन्थे पाठः प्रस्तूयते -

हिङ्गुं च शतवीरा च दाडिमं सैन्धवं तथा ।

त्रिकटुः शतपुष्पा च नागपुष्पं शतावरी ॥ ख.९.६२ ॥

अत्र शतवीरा इत्ययं पाठः शब्दकोशे न विद्यते | शतवीर्या नामकं दूर्वातृणम् | शब्दकोशे यथा-

१. **शतवीर्या f. white. flowering Dūrvā grass [MW.]**[24]
२. **Cynodon dactylon, Pers.**[25]
३. **दूर्वा शुक्ला तु गोलोमी शतवीर्या च कथ्यते |**

||भा.प्र.पू.मिश्र.४.१५१||

तथा च सुश्रुतेन

---

[23] ibid.pg.५१९

[24] (MONIER-WILLIAMS, 1899),pg.१०५०

[25] (C.P.Khare, 2007)pg.202,203

छत्रामतिच्छत्रां लाङ्गूलीं जटिलां ब्रह्मचारिणीं लक्ष्मीं गुहामतिगुहां वचामतिविषां शतवीर्यां सहस्रवीर्यां सिद्धार्थकांश्च शिरसा धारयेत् || सु. सू. १९ .२९ ||

अपि त्वत्र शतवीर्या शतावरी सहस्रवीर्या तु श्वेतदूर्वा इति डल्हणेन प्रतिपादितम् |[26]

तदविपरीतं चरके षड्विरेचनशताश्रितीयाध्याये प्रतिपादितम् यत् -

ऐन्द्रीब्राह्मीशतवीर्यासहस्रवीर्याऽमोघाऽव्यथाशिवाऽरिष्टावाट्यपुष्पीविष्वक्सेनकान्ता इति दशेमानि प्रजास्थापनानि भवन्ति || च. सू. ४.१८ ||

अत्र चक्रपाणिदत्तेन शतवीर्यासहस्रवीर्ये दूर्वे इति |[27]

ग्रन्थान्तरेषु चापि दृश्यते तद्यथा -

हिङ्गुं च शतवीर्या च दाडिमं सैन्धवं तथा ।

त्रिकटुः शतपुष्पा च नागपुष्पं शतावरी ॥ अ.ब.क.ग. ९.५८ ॥

ग्रन्थान्तरपाठेषु शतवीर्या समुपलभ्यते | अत शतवीरा अपपाठः तत्र स्थाने शतवीर्या प्रयोजनीया |

---

[26] द्रष्टव्यम्, (सुश्रुत, 2010), डल्हणटीका, सु.सू.१९.२९

[27] (चरक, 2010), आयुर्वेददीपिका, च. सू. ४.१८

पाठभेदाः-

ग्रन्थान्तरेषूपलब्धाः पाठभेदाः परिशिष्टे प्रदीयते ग्रन्थविस्तारभयान्न विविच्यन्ते |

अधिकपाठाः/भिन्नपाठाः -

ग्रन्थान्तरेषु ये केऽप्यधिकपाठाः दृश्यन्ते तेऽपि विवेचनीयाः |

अ.क्र.	**अधिकपाठाः/ भिन्नपाठाः**	**संदर्भक्रमः**
1	कल्कादिवेष्टितं कृत्वा निर्गिलेदुपदंशके	क,ग.२.४२
2	कर्षा द्वादश तालस्य कूष्माण्डरससंभृते	क,ग.६.२४३
3	घर्षयेद्बहुधा तत्तु यावत्कज्जलिका भवेत्	क, ग ६.२४४
4	कुमार्युन्मत्तभल्लातत्रिफलाम्बुपुनर्नवाः	क.ग.६.२४६
5	हण्डिकां कण्ठपर्यन्तां कुमारीरसयोगतः	क.ग.६.२४८
6	पूरयेच्च ततो मुद्रां दृढां कुर्यात्प्रयत्नतः	क,ग.६.२४९
7	गन्धावल्गुजचित्रकान्	क,ग.६.२६५
8	पद्मकन्दकसेरूणां रसे कासस्य भावयेत्	ख.६.२९१
9	बीजं मर्कटिशाल्मली त्रिफलकं चूर्णं समं कल्पयेत्	ख.६.३१०a
10	कर्षार्धा गुटिकावलेहमथवा सेव्यं सदा सर्वथा	ख.६.३१०b

१. कल्कादिवेष्टितं..... || क,ग.२.४२ ||

रसकर्पूरनिर्मितिविधौ क.ग. ग्रन्थयोः एते श्लोका उपलभ्यन्ते-

खटीष्टयगैरिका वल्मीमृत्तिका सैन्धवं समम् ॥ २.३९ ॥

भागद्वयमितं गन्धं रसं भागद्वयं स्मृतम् ।

हण्डिकायां विनिक्षिप्य पार्श्वे पार्श्वे च खर्पटान् ॥२.४० ॥

दग्ध्वाथ हण्डिकां दत्त्वा द्विरष्टप्रहरं पचेत् ।

मृतसूतं तु गृह्णीयाच्छुद्ध कर्पूरसन्निभम् ॥ २.४१ ॥

कल्कादिवेष्टितं कृत्वा निर्गिलेदुपदंशके || २.४२ ||

अत्र अ-ब-हस्तलिखित-ख-ग्रन्थादिषु कल्कादि-वेष्टितादिपाठः न दृश्यते- अत्र वालुकायन्त्रे पाचनप्रक्रिया कोष्टकरूपेण प्रस्तूयते

ग्रन्थसंक्षेपः -->		**अ**	**ब**	**क**	**ख**	**ग**
द्रव्याणि	खटी	+	+	+	+	+
	इष्टिः	+	+	+	+	+
	गैरिका	+	+	+	+	+
	वल्मी	+	+	+	+	+
	सैन्धवः	+	+	+	+	+
	पारदः	+	+	+	+	+
	गन्धकः	+	+	+	+	+
	कल्कः	-	-	+	-	+
उपकरणम्	वालुकायन्त्रम्	+	+	+	+	+
अग्निकालः		१६प्र.	१६प्र.	१६प्र.	१६प्र.	१६प्र.

कल्कादिवेष्टनप्रक्रिया भारतभैषज्यरत्नाकरे ये पञ्च विधयो रसकर्पूरनिर्माणविधौ तेष्वपि नोक्ता खलु ।[28]

कगग्रन्थयोर्मध्ये उपदंशे कल्कादिवेष्टितरसकर्पूरस्य निर्गलनमुक्तमपि भारतभैषज्येपि उपदंशचिकित्सायां रसकर्पूरगुटिका रसकर्पूरयोगश्चाह तद्यथा-

रसकर्पूरगुटिका

रसदीपकभल्लातकुशमूलैः कृता वटी।

बदरीफलमानेन नाशयेदुपदंशकम् ॥ भा.भै.रत्ना.४.६०४८ ||

रसकर्पूरयोगः

गोधूमचूर्ण सन्नीय विदध्यात्सूक्ष्मकूपिकाम् ।

तन्मध्ये रसकपूरं चतुर्गुामितं क्षिपेत् ॥

ततस्तु गुटिकां कुर्याद्यथा न स्याद्रसो बहिः ।

लवङ्गसूक्ष्मचूर्णेन तां वटीमवधूलयेत् ॥

दन्तस्पर्णो यथा न स्यात्तथा तामम्भसा गिलेत् ।

ताम्बूलं भक्षयेत्पश्चाच्छाकाम्ललवणं त्यजेत् ॥

---

[28] (Nagindas Chaganlal Shah, भारत भैषज्य रत्नाकर ४),4.6050-6053,pg.391-394

श्रममातपमध्वानं विशेषात्स्त्रीनिषेवणम् ।

फिरङ्गसङ्घको रोगः सर्वथा प्रशमं व्रजेत् ॥

भक्षितोऽनेन विधिना मुखशोथं न विन्दति ।

पञ्चवल्ककषायेण गण्डूष कारयेद्भिषक् ।।

पला जीरकं चैव खदिरं माषमात्रकम् ।

जलेन पेषयित्वा तु कवलं कारयेद्भिषक् ।।

तेनैवोपशमं याति मुखपाकं सुदारुणम् || भा.भै.रत्ना.४.६०४९ ||

अत्रापि कल्कादिवेष्टितरसकर्पूरस्य निर्गलनविधानं न विद्यते | तात्पर्यं यत् कल्कादिवेष्टितादौ पाठे संशोधनमपेक्ष्यते |

२. **कर्षा द्वादश तालस्य कूष्माण्डरससंभृते || क.ग.६.२४३ ||**

षष्ठाध्याये तालेश्वररसनिर्माणप्रक्रियायां क-ग-संज्ञित-ग्रन्थयोर्मध्ये प्रस्तुतः पाठः उपलभ्यते |

अन्यत्र तु

द्वादशं कर्षतालं च कूष्माण्डस्वरसे क्षिपेत् ||

|| अ.ब.ख.६.२४३ ||

एवं पाठः दृश्यते | उभयोः पाठयोरर्थः समन्वितो न तु व्यभिनत् | कूष्माण्डरससंभृते नाम कूष्माण्डस्वरसे क्षिपेदिति |

ततोऽपि चिकित्सति सति भारतभैषज्यरत्नाकरे रसमञ्जरीतः उद्धृतपाठस्तु-

द्वादशं कर्षतालं च कूष्माण्डस्वरसे क्षिपेत् ||

|| भा.भै.रत्ना.२.२६८३ ||[29]

तस्मादिदं सिध्यते यदस्मिन् पुस्तके स्वीकृतपाठः साधुतरः |

३. घर्षयेद्बहुधा तत्तु यावत्कज्जलिका भवेत् || क.ग.६.२४४||

षष्ठाध्याये तालेश्वररसनिर्माणप्रक्रियायां क-ग-संज्ञित-ग्रन्थयोर्मध्ये प्रस्तुतः पाठः उपलभ्यते |

अन्यत्र तु -

तन्मर्द्यं बहुवारीणि नीलाभा कज्जली भवेत् ||

|| अ.ब.ख.६.२४४ ||

कगपाठानु यावत् घर्षयेत् तावत् कज्जली भवेदित्याशयः | किंतु अ.ब.ख-संज्ञितग्रन्थगतपाठः स्पष्टार्थकस्तद्यथा-

मर्द्यम् नाम मर्दयेद् यावत् नीलाभा कज्जली भवेत् | अत्र मर्दनसीमा परिमिता तस्मादयं साधीष्ठः पाठः | तथा च पूर्ववदत्रापि भा.भै.रत्नाकरे स्वीकृतिः दृश्यते-

---

[29] भारत भैषज्यरत्नाकर २, pg.४६७

तन्मर्द्यं बहुवारीणि नीलाभा कज्जली भवेत् ||

|| भा.भै.रत्ना.२.२६८३||

४. कुमार्युन्मत्तभल्लातत्रिफलाम्बुपुनर्नवाः || क.ग.६.२४६ ||

षष्ठाध्याये तालेश्वररसनिर्माणप्रक्रियायां क-ग-संज्ञित-ग्रन्थयोर्मध्ये प्रस्तुतः पाठः उपलभ्यते | अत्र भावनावर्णनं क्रियते | तत्र

१. कुमारी नाम घृतकुमारीमज्जा |

२. उन्मत्तभल्लातः नाम भल्लातकफलक्वाथः |

३. त्रिफलाम्बु नाम त्रिफलाक्वाथः |

४. पुनर्नवा नाम पुनर्नवाक्वाथः |

अन्यत्र तु कुमारी भल्लातकः त्रिफला पुनर्नवा चेति समुदीर्यन्ते तद्यथा-

कुमारीपत्रभल्लाता त्रिफला तु पुनर्नवा ||

|| अ.ब.ख.६.२४६ ||

तथा च भारतभैषज्येऽपि

कुमारीपत्रभल्लाता त्रिफला तु पुनर्नवा ||

|| भा.भै.रत्ना.२.२६८३ ||

ततो अत्र उन्मत्तभल्लातः त्रिफलाम्बु आदिनिर्दर्शनस्य प्रयोजनं न स्पष्टीभूयते |

५. हण्डिकां कण्ठपर्यन्तां कुमारीरसयोगतः || क.ग.६.२४८ ||

अत्रापि पूर्ववत् स्पष्टार्थका विवेचनविशेषत्वादयं पाठः न विशेषो दृश्यते | यथा

हण्डिकाखण्डपर्यन्तं मज्जानं कन्यकोद्भवम् ||

|| अबख.६.२४८ ||भा.भै.रत्ना.२.२६८३||

६. पूरयेच्च ततो मुद्रां दृढां कुर्यात्प्रयत्नतः || कग.६.२४९||

षष्ठाध्याये तालेश्वररसनिर्माणप्रक्रियायां क-ग-संज्ञित ग्रन्थयोर्मध्ये प्रस्तुतः पाठः उपलभ्यते | अत्र प्रक्रियायां कथ्यते यत् प्रयत्नतः तदास्यं दृढां मुद्रां पूरयेत् स्थापयेदिति तु अन्यत्र -

ततो मुद्रां दृढं कुर्यादूर्ध्वास्यं रोधितं किल ||

|| अ.ब.६.२४९ ||

ततो मुद्रां दृढं कुर्यादूर्ध्वास्यं योषितां किल ||

|| ख.६.२४९ ||

अत्र योषितां इति पाठः खसंज्ञिते ग्रन्थे उपलब्धः | रोधितमिति बहु स्पष्टार्थकः | ततोऽपि भारतभैषज्ये दृश्यते |[30]

---

[30] भारत भैषज्यरत्नाकर २, pg.४६७

७. गन्धावल्गुजचित्रकान् || क.ग.६.२६५ ||

षष्ठाध्याये ब्रह्मरसनिर्माणप्रक्रियायां क-ग-संज्ञित-ग्रन्थयोर्मध्ये प्रस्तुतः पाठः उपलभ्यते-

भागैकं मूर्च्छितं सूतं गन्धावल्गुजचित्रकान् ।

चूर्णं तु ब्रह्मबीजानां प्रतिद्वादशभागिकम् ||क.ग.६.२६५ ||

भागांस्त्रिंशद्गुडस्यापि क्षौद्रेण गुटिका कृता ।

अत्र ब्रह्मरसगतद्रव्याणि यथा-

१. मूर्छितसूतं (पारदभस्म/रससिन्दूरः)

२. गन्धकः

३. अवल्गुजः

४. चित्रकः

५. ब्रह्मबीजम्

६. गुडः

अपि तु ब्रह्मरसनिर्माणप्रक्रियायां अबख-संज्ञितेषु ग्रन्थेषु -

भागैकं मूर्च्छितं सूतं गन्धकं वह्निवाकुची ।

चूर्णं तु ब्रह्मबीजानां प्रतिद्वादशभागकम् ॥अबख. ६.२६५ ॥

भागांस्त्रिंशद्गुडस्यापि क्षौद्रेण गुटिका कृता ।

१. मूर्छितसूतं (पारदभस्म/रससिन्दूरः)

२. गन्धकः

३. वह्नि

४. वाकुची

५. ब्रह्मबीजम्

६. गुडः

अत्र वह्निः वाकुची द्वेऽपि अवल्गुजः चित्रकः द्वयोः समन्वितौ | अत्र तु केवलं पर्यायिनः शब्दाः तद्यथा- वह्निः नाम चित्रकः यथा राजनिघण्टौ-

चित्रकोऽग्निश्च शार्दूलश्चित्रः पाली कटुः शिखी |

कृशानुर्दहनो व्यालो ज्योतिष्कः पालकस्तथा ||रा.नि.६.४३||

अनलो दारुणो वह्निः पावकः शबलस्तथा |

पाठी द्वीपी च चित्राङ्गो ज्ञेयः शूरश्च विंशतिः ||रा.नि.६.४४||

तथा च वाकुची अवल्गुजा अपि समन्वितौ उक्तं राजनिघण्टौ च-

बाकुची सोमराजी च सोमवल्ली सुवल्लिका |

सिता सितावरी चन्द्रलेखा चान्द्री च सुप्रभा ||रा.नि.४.६२||

कुष्ठहन्त्री च काम्बोजी प्रतिगन्धा च वल्गुजा |

स्मृता चन्द्राभिधा राजी काल्माषी च तथैन्दवी ||रा.नि.४.६३||

कुष्ठदोषापहा चैव कान्तिदाऽवल्गुजा तथा |

चन्द्राभिधा प्रभायुक्ता विंशति स्यात्तु नामतः ||रा.नि.४.६४||

भारतभैषज्ये तु-

भागैकं मूर्च्छितं सूतं गन्धकत्वग्निवाकुजी ||

||भा.भै.रत्ना.३.४७५५||

अत्र अग्निः वाकुजी इति पदद्वयं समुल्लिखितम् | उभावपि चित्रकावल्गुजसमानार्थकौ |

शेषाः पाठभेदाः यथावद् भिषग्वरैः परिशीलनीयाः |

==============

रसमञ्जरी ग्रन्थरचना

रसमञ्जरी-ग्रन्थे १० अध्यायाः विद्यन्ते तेषु श्लोकसङ्ख्या कोष्टकरूपेण अधोनिर्दिश्यते -

अध्यायः	**अभिधानम्**	**श्लोकसङ्ख्या**
१	रसशोधनप्रकरणकथनम्	३७
२	रसजारणमारणकथनम्	६३
३	उपरसशोधनमारणकथनम्	१०२
४	विषलक्षणसेवापरिहारकथनम्	३४
५	स्वर्णाद्यष्टधातुशोधनमारणसेवनकथनम्	७१
६	रसयोगनिरूपणम्	३४५
७	रसायनगुटिकाकथनम्	२७
८	नेत्राञ्जनकेशरञ्जनम्	२८
९	वीर्यस्तम्भनबालतन्त्रम्	१०२
१०	कालविज्ञानछायापुरुषविज्ञानम्	५८
	आहत्य	८६७

विषयवस्तु -

रसमञ्जर्याः प्रत्यध्यायं विषयवस्तु तद्यथा-

1. **प्रथमोऽध्यायः, रसशोधनप्रकरणकथनम्**

श्रीगणपतिस्तुतिः, श्रीशारदास्तुतिः, ग्रन्थारम्भः, पारदप्रकरणम्, गुरुसेवामाहात्म्यम्, गुरुलक्षणम्, शिष्यलक्षणम्, पारदनामानि, पारदलक्षणम्, पारददोषाः, पारदशोधनविधिः, तप्तखल्वम्, पारदशोधनानि चतुर्विधानि समुल्लिखितानि |

२. द्वितीयोऽध्यायः रसजारणमारणकथनम्

षड्गुणजारणम्, सुवर्णजारणम्, रसमारणम्, द्विधः रसभस्मविधिः, अष्टविधः रससिन्दूरनिर्माणविधिः, ततः द्विविधः रसकर्पूरविधिः, द्विविधं रसमूर्छनम्, ततो गुणकथनम्, बद्धपारदलक्षणम्, मूर्छितपारदलक्षणम्, मृतपारदलक्षणम्, निर्बीजबद्धपारदः, सबीजबद्धपारदः, ककाराष्टकमिति विषयाः वर्णिताः |

३. तृतीयोऽध्यायः उपरसशोधनमारणकथनम्

उपरसाः, तेषु गन्धकः तस्योत्पत्तिः,तस्य त्रिविधं शोधनम्, गन्धकतैलम्, वज्रजातयः, अशोधितवज्रदोषः,द्विविधं वज्रशोधनम्, तथा च त्रिविधं वज्रमारणम् |

ततो वैक्रान्तमारणम्, शोधनम्, तस्य सत्त्वपातनम् |

ततो अभ्रकलक्षणम्, धान्याभ्रककरणविधिः, द्विविधम् अभ्रकशोधनम्, चतुर्विधं चाभ्रकमारणम्, अभ्रकसत्त्वपातनम, अभ्रकद्रावणम्, सर्वसत्त्वपातनविधिः |

तस्मादनन्तरम् भूनागसत्त्वपातनम् |

ततो अशुद्धहरतालदोषा, हरतालशोधनमारणम् |

ततोपि मनःशिलाशोधनम्, तस्याः गुणाः |

अपि च रसकशोधनम् | तुत्थशोधनम्, तस्य गुणाः | विमलशोधनम् | माक्षिकशोधनम्, तस्य मारणम्, गुणाश्च |

कासीसशोधनम्, तस्य गुणाः | कान्तपाषाणशोधनम्, वराटिका, तस्याः शोधनम्, गुणाः |

हिङ्गुलशोधनम्, तस्य गुणाः | शिलाजतुशोधनम्, तस्य शिलाजतुगुणाः | सामान्यम् उपरसशोधनम् च |

रत्नशोधनम्, मारणम्,गुणाः तेनैव विषयविस्तारः |

४.चतुर्थोऽध्यायः विषलक्षणसेवापरिहारकथनम्

विषनामानि, तल्लक्षणानि, मारणम्, शोधनम्, विषसेवनम्, अष्टवेगाः, विषवेगपरिहारः इत्यनेनोपसंहारः क्रियते |

५.पञ्चमोऽध्यायः, स्वर्णाद्यष्टधातुशोधनमारणसेवनकथनम्

अष्टधातुशोधनमारणम् कथ्यते | तेषु

१.स्वर्णशोधनम्, पञ्चविधः स्वर्णभस्मविधिः निरूपितः | ततः स्वर्णगुणाः |

२. रजतशोधनम्, त्रिविधं रजतमारणम् | रजतभस्मगुणाः |

३. ताम्रशोधनावश्यकता, तस्य दोषाः, द्विविधं शोधनम्, त्रिविधः ताम्रभस्मविधिः, तस्य गुणाश्च |

४.राजरीतिशोधनमारणम्, ५.घोषशोधनमारणम् | ६.नागशोधनम्, द्विविधं मारणम्, नागभस्मनो गुणाः |

७.वङ्गशोधनम्, द्विविधं मारणम् च, वङ्गभस्मगुणाः च |

८.लोहशोधनम्, चतुर्विधः लोहभस्मविधिः | ततो लोहभस्मपरीक्षा, लोहनिरुत्थभस्म, लोहभस्मगुणाः तथा च लोहस्य पथ्यापथ्यविधिः | किट्टग्रहणमनेनाध्यायसमाप्तिः |

६.षष्ठोऽध्यायः रसयोगनिरूपणम्

अतीव विशालकायो अध्यायोयम् | अत्र ३४५ श्लोकाः गदिताः | प्रथमतः धन्वन्तरिवन्दना, रसवैद्यमहत्त्वम् , पारदमहत्त्वम् | ततो रसनिरूपणमारभ्यते | तत्र ८१ रसाः निरूपिताः ते यथा-

1.रत्नगर्भपोटलीरसः, 2.मृगाङ्करसः, 3.लोकनाथरसः, 4.लोकेश्वरपोटलीरसः, 5.लोकेश्वरपोटलीरससेवनम्, 6.राजमृगाङ्करसः, 7.रत्नगिरिरसः, 8.सेवनविधिः, 9.हिङ्गुलेश्वररसः, 10.शीतभञ्जीरसः, 11.शीतभञ्जीरसः, 12.शीतारिरसः, 13.ज्वरराजरसः, 14.प्राणेश्वररसः, 15.सेवनविधिः, 16.नवज्वरेभसिंहरसः, 17.पञ्चाननज्वराङ्कुशरसः, 18.पञ्चाननरसः, 19.मृतसंजीवनीरसः, 20.सेवनविधिः, 21.रविसुन्दररसः, 22.सन्निपातभैरवरसः, 23.भस्मेश्वररसः, 24.प्रतापलङ्केश्वररसः, 25.सेवनविधिः, 26.महोदधिरसः, 27.महोदधिवटी, 28.उन्मत्तरसः,

29.संज्ञाकरणरसः, 30.चन्द्रशेखररसः, 31.कनकसुन्दररसः, 32.रामबाणरसः, 33.चन्द्रप्रभावटी, 34.चित्राम्बररसः, 35.ग्रहणीकपाटरसःद्विविधः, 36.वज्रकपाटरसः, 37.आनन्दभैरवरसः, 38.मेघडम्बररसः, 39.त्रिगुणाख्यरसः, 40.वातरिपुरसः, 41.वातगजाङ्कुशरसः, 42.अम्लपित्तान्तकरसः, 43.अग्निकुमाररसः द्विविधः, 44.लीलाविलासरसः, 45.मन्थानभैरवरसः, 46.क्रव्यादरसः, 47.अग्नितुण्डीवटी, 48.आनन्दोदयरसः, 49.चिन्तामणिरसः, 50.राजवल्लभरसः, 51.त्रिनेत्राख्यरसः, 52.मेहवज्ररसः, 53.इन्द्रवटीरसः, 54.रसेन्द्रमङ्गलरसः, 55.सर्वेश्वररसः, 56.तालेश्वररसः द्विविधः, 57.स्वर्णक्षीरीरसः, 58.शूलगजकेसरीरसः, 59.ब्रह्मरसः, 60.इन्दुधररसः, 61.पारिभद्ररसः, 62.श्वेताररिसः, 63.कालाग्निरुद्ररसः, 64.मकरध्वजरसः, 65.मदनकामदेवरसः, 66.पूर्णेन्दुरसः, 67.कामिनीमदभञ्जनरसः, 68.मदनोदयरसः, 69.अनङ्गसुन्दररसः, 70.कामेश्वररसः, 71.अजीर्णकण्टकरसः, 72.उदयभास्कररसः, 73.रौद्ररसः, 74.नित्योदितरसः, 75.अर्शकुठाररसः, 76.विद्याधररसः, 77.वङ्गेश्वररसः, 78.उदरारिरसः, 79.जलोदरारिरसः, 80.नाराचरसः, 81.इच्छाभेदिरसः इति रसाः वर्णिताः |

७.सप्तमोऽध्यायः रसायनगुटिकाकथनम्

अयं रसायनाधिकारश्च | तत्र गन्धामृतरसायनम्, हेमसुन्दररसः, मृतसंजीवनी गुटिका, वीर्यरोधिनी गुटिकाकथनेनाध्यायसमाप्तिः |

८.अष्टमोऽध्यायः नेत्राञ्जनकेशरञ्जनम्

अञ्जनविधिः, वर्तिप्रमाणम्, नेत्रामयविनाशनाञ्जनम्, नयनामृतानञ्जनम्, दृष्टिदाञ्जनम् , शङ्खाद्यञ्जनम् , अपामार्ग-शिखाद्यञ्जनम्, दन्तादिवर्तिः, तुत्थाञ्जनम् , चन्द्रोदयावर्तिः, प्रत्यञ्जनम्, नेत्ररोगप्रणाशः ।

ततः केशरञ्जनम्, द्विविधं पलितनाशनम्, शुक्लीकरणम् तेनाध्यायपूर्तिः ।

९.नवमोऽध्यायः वीर्यस्तम्भनबालतन्त्रम्

तत्र नवविधं वीर्यस्तम्भनम् कथ्यते । ततः स्थूलीकरणम्, ध्वस्तीकरणम्, षण्ढत्वकरणम्, षण्ढत्वनाशनमिति । ततः स्त्रीद्रावणम्,त्रिविधं स्त्रीवशीकरणम्, स्त्रीवशीकरणयन्त्रम्, भगसङ्कोचनम्, द्विविधं विद्वेषकरणम्, द्विविधं स्तनदृढीकरणम् च । चतुर्विधं वन्ध्याकरणम् । ततो वन्ध्यात्वनिवारणम् तथा गर्भप्रदविधिः दशप्रकारको वर्णितः । गर्भस्तम्भनम्, द्विविधः सुखप्रसवोपायः।

ततो बालतन्त्रमारभ्यते । तत्र षोडशी योगिन्यः समुल्लिखिताः । तासामभिधानानि यथा-

1.मन्दा, 2.सुनन्दा, 3.पूतना, 4.बिडाली, 5.नर्तकी, 6.शकुनी, 7.शुष्काशिवा, 8.जृम्भका, 9.अचिन्ता, 10.कापालिका, 11.लिप्सिता, 12.पीतली, 13.भद्रकाली, 14.तारा, 15.शर्वरी, 16.कुमारी । पूजाविधिबलिदानकथनपूर्वकम् अध्यायसमापनम् ।

१०.दशमोऽध्यायः कालविज्ञानछायापुरुषविज्ञानम्

कालविज्ञानम्, दूताज्ज्ञानम्, नवविधम् अरिष्टलक्षणम् | ततो मासारिष्टकथनम्, दिनारिष्टकथनम् | छायापुरुषलक्षणम्, अरिष्टदर्शनम्, छायापुरुषसाधनफलम्, तत उपसंहारपुष्पिकया ग्रन्थसमाप्तिः |

एवं विषयवस्तु चापि केचन वैद्याः प्राचीनाचार्यविरचितान् ग्रन्थान् कुतश्चित्स्वगृहाद्वा ग्रन्थालयेषु च समधिगच्छन्ति तान् सूर्यदेवमपि नोपदर्शयन्ति, किं पुनरस्मान्दृशान् |

अत एव धर्मार्थ-ट्रस्ट रघुनाथमन्दिरम्, जम्मू-काश्मीर, श्रीसमर्थ-वाग्देवता-मन्दिरम्, धुले, महाराष्ट्रराज्यम्, जॉर्ज-ऑगस्ट-विश्वविद्यालयः,गोटेङ्गन- जर्मनीराष्ट्रम्, संस्कृतविकिस्रोतः, संस्कृतविश्वम् जर्मनी, खेमराज-श्रीकृष्णदासेन प्रकाशनम्, मुम्बई, चौखम्भा ओरियन्टालिया, वाराणसी एतेभ्यो धन्यवादाः प्रदीयन्ते | तेषां सहाय्येनैवायं संशोधितावृत्तिः विनिर्मिता | तथा च भिषग्वराः श्रीराम-सावरीकरः, वैद्यः प्रसाद-अकोलकरः, आचार्याः सिद्धिनन्दन-मिश्रः आदीनामृणे एव न्युष्यते नितराम् |

eBook Publication Pvt. Ltd.® प्रकाशनेनायं ग्रन्थः प्रकाशितस्तथा ebook स्वरूपेण सर्वेष्वान्तर्जालपुटेन वितीर्यते अत आभाराः प्रकटीक्रियन्ते |

आयुर्वेदकल्पतरुं प्रत्यहमुत्तरोत्तरमतिवेलं परिपोषयेयुः विश्वभिषग्वराः संशोधकाः आयुर्वेदविद्यार्थिनश्च | एतादृशदुष्करकर्मणि

मादृशस्याशक्तस्य मन्दमतेः प्रभुश्रीरामकृपालाभादेशस्य शिरोधार्यया कृतोऽयं प्रयत्नशचेद् भारतीयभिषजां किञ्चिदप्युकारजातमुपजनयेत्तदात्मानं सफलपरिश्रमं मन्येय |

- डॉ. नीलेश-जोशी

महाशिवरात्री,

४ मार्च, २०१९

रसमञ्जरी

अनुक्रमणिका

१.प्रथमोऽध्यायः 21

|| रसशोधनप्रकरणकथनम् || 21

श्रीगणपतिस्तुतिः 21

श्रीशारदास्तुतिः 21

ग्रन्थारम्भः 21

पारदप्रकरणम् 22

गुरुसेवामाहात्म्यम् 23

गुरुलक्षणम् 23

शिष्यलक्षणम् 23

पारदनामानि 24

पारदलक्षणम् 24

पारददोषाः 24

पारदशोधनविधिः 25

तप्तखल्वम् 26

पारदशोधनम् (२) 26

पारदशोधनम् (३) 27

पारदशोधनम् (४) 27

२. द्वितीयोऽध्यायः 29
|| रसजारणमारणकथनम् || 29
षड्गुणजारणम् 29
सुवर्णजारणम् 29
रसमारणम् 30
रसभस्मविधिः (१) 30
रसभस्मविधिः (२) 31
रससिन्दूरनिर्माणम्(१) 31
रससिन्दूरनिर्माणम्(२) 31
रससिन्दूरनिर्माणम् (३) 32
रससिन्दूरनिर्माणम् (४) 32
रससिन्दूरनिर्माणम् (५) 33
रससिन्दूरनिर्माणम् (६) 33
रससिन्दूरनिर्माणम् (७) 34
रससिन्दूरनिर्माणम् (८) 34
रसकर्पूरः (१) 35
रसकर्पूरः (२) 36
रसमूर्छनम् (१) 36
रसमूर्छनम् (२) 37

गुणकथनम् 37

बद्धपारदलक्षणम् 38

मूर्छितपारदलक्षणम् 38

मृतपारदलक्षणम् 38

निर्बीजबद्धपारदः 38

सबीजबद्धपारदः 39

ककाराष्टकम् 39

३. तृतीयोऽध्यायः 41

|| उपरसशोधनमारणकथनम् || 41

उपरसाः 41

गन्धकोत्पत्तिः 41

गन्धकशोधनम् (१) 42

गन्धकशोधनम् (२) 42

गन्धकशोधनम् (३) 42

गन्धकतैलम् 43

वज्रजातयः 43

अशोधितवज्रदोषः 44

वज्रशोधनम् (१) 44

वज्रशोधनम् (२) 44

वज्रमारणम्(१) 45

वज्रमारणम्(२) 45

वज्रभस्म(३) 45

वैक्रान्तमारणम् 46

वैक्रान्तशोधनम् 46

वैक्रान्तसत्त्वपातनम् 46

अभ्रकलक्षणम् 47

धान्याभ्रककरणविधिः 47

अभ्रकशोधनम् (१) 48

अभ्रकशोधनम् (२) 48

अभ्रकमारणम् (१) 48

अभ्रमारणम्) २(........ 48

अभ्रमारणम्) ३(........ 49

अभ्रमारणम्) ४(........ 50

अभ्रकसत्त्वपातनम् 50

अभ्रकद्रावणम् 51

सर्वसत्त्वपातनविधिः 51

भूनागसत्त्वपातनम् 51

अशुद्धहरतालदोषाः 52

हरतालशोधनमारणम् 52
हरतालमारणम् 52
मनःशिलाशोधनम् 53
मनःशिलागुणाः 53
रसकशोधनम् 53
तुत्थशोधनम् 53
तुत्थगुणाः 53
विमलशोधनम् 54
माक्षिकशोधनम् 54
माक्षिकमारणम् 54
माक्षिकगुणाः 54
कासीसशोधनम् 55
कासीसगुणाः 55
कान्तपाषाणशोधनम् 55
वराटिका 55
वराटिकाशोधनम् 56
वराटिकागुणाः 56
हिङ्गुलशोधनम् 56
हिङ्गुलगुणाः 56

शिलाजतुशोधनम् 56
शिलाजतुगुणाः 56
उपरसशोधनम् 57
रत्नशोधनम् 57
रत्नमारणम् 57
रत्नगुणाः 57
४.चतुर्थोऽध्यायः 59
|| विषलक्षणसेवापरिहारकथनम् || 59
विषनामानि 59
विषलक्षणानि 59
विषमारणम् 60
विषशोधनम् 60
विषसेवनम् 61
अष्टवेगाः 62
विषवेगपरिहारः 62
विषमारणम् 63
५.पञ्चमोऽध्यायः 65
|| स्वर्णाद्यष्टधातुशोधनमारणसेवनकथनम् || 65
अष्टधातुशोधनमारणम् 65

स्वर्णशोधनम् 65
स्वर्णभस्म (१) 65
स्वर्णभस्म (२) 66
स्वर्णभस्म (३) 66
स्वर्णभस्म (४) 66
स्वर्णभस्म (५) 67
स्वर्णगुणाः 67
रजतशोधनम् 67
रजतमारणम् (१) 67
रजतमारणम् (२) 68
रजतमारणम्(३) 68
रजतभस्मगुणाः 68
ताम्रशोधनावश्यकता 69
ताम्रदोषाः 69
ताम्रशोधनम् (१) 69
ताम्रशोधनम् (२) 69
ताम्रभस्म (१) 69
ताम्रभस्म (२) 70
ताम्रभस्म (३) 70

ताम्रभस्मगुणाः 71
राजरीतिघोषशोधनमारणम् 71
नागवङ्गशोधनम् 71
नागमारणम्(१) 72
नागमारणम् (२) 72
नागभस्मगुणाः 72
वङ्गमारणम्(१) 72
वङ्गमारणम्(२) 73
वङ्गभस्मगुणाः 73
लोहशोधनम् 73
लोहभस्म (१) 74
लोहभस्म (२) 74
लोहभस्म (३) 74
लोहभस्म (४) 75
लोहभस्म (५) 75
लोहभस्मपरीक्षा 75
लोहनिरुत्थभस्म 76
लोहभस्मगुणाः 76
लोहस्य पथ्यापथ्यविधिः 76

किट्टग्रहणम्.......... 76

६.षष्ठोऽध्यायः.......... 78

|| रसयोगनिरूपणम् ||.......... 78

धन्वन्तरिवन्दना.......... 78

रसवैद्यमहत्त्वम्.......... 78

पारदमहत्त्वम्.......... 78

रत्नगर्भपोटलीरसः.......... 78

मृगाङ्करसः 79

लोकनाथरसः.......... 81

लोकेश्वरपोटलीरसः.......... 81

लोकेश्वरपोटलीरससेवनम्.......... 82

फलानि.......... 82

राजमृगाङ्करसः 82

रत्नगिरिरसः.......... 83

सेवनविधिः.......... 84

हिङ्गुलेश्वररसः.......... 84

शीतभञ्जीरसः (१).......... 84

शीतभञ्जीरसः (२).......... 85

शीतारिरसः.......... 85

ज्वरराजरसः 86

महाज्वराङ्कुशरसः 86

प्राणेश्वररसः 87

सेवनविधिः 88

नवज्वरेभसिंहरसः 88

पञ्चाननज्वराङ्कुशरसः 89

पञ्चाननरसः 89

मृतसंजीवनीरसः 89

सेवनविधिः 90

रविसुन्दररसः 90

सन्निपातभैरवरसः 91

भस्मेश्वररसः 91

प्रतापलङ्केश्वररसः 91

सेवनविधिः 93

महोदधिरसः 94

महोदधिवटी 95

उन्मत्तरसः 95

संज्ञाकरणरसः 95

चन्द्रशेखररसः 96

कनकसुन्दररसः 96

रामबाणरसः 97

चन्द्रप्रभावटी 98

चित्राम्बररसः 98

ग्रहणीकपाटरसः (१) 98

ग्रहणीकपाटरसः (२) 99

वज्रकपाटरसः 100

विजयभैरवरसः 101

आनन्दभैरवरसः 101

मेघडम्बररसः 102

त्रिगुणाख्यरसः 102

वातरिपुरसः 103

वातगजाङ्कुशरसः 103

अम्लपित्तान्तकरसः 104

अग्निकुमाररसः (१) 104

अग्निकुमाररसः (२) 105

लीलाविलासरसः 105

मन्थानभैरवरसः 105

क्रव्यादरसः 106

अग्नितुण्डीवटी 106

आनन्दोदयरसः 107

चिन्तामणिरसः 107

राजवल्लभरसः 108

त्रिनेत्राख्यरसः 108

मेहवज्ररसः 108

इन्द्रवटीरसः 109

रसेन्द्रमङ्गलरसः 109

सर्वेश्वररसः 111

तालेश्वररसः (१) 112

तालेश्वररसः (२) 114

स्वर्णक्षीरीरसः 115

शूलगजकेसरीरसः 115

ब्रह्मरसः 116

इन्दुधररसः 116

पारिभद्ररसः 117

श्वेतारिरसः 117

कालाग्निरुद्ररसः 117

मकरध्वजरसः 118

मदनकामदेवरसः.. 119

पूर्णेन्दुरसः.. 120

कामिनीमदभञ्जनरसः 121

मदनोदयरसः.. 121

अनङ्गसुन्दररसः 122

कामेश्वररसः 122

अजीर्णकण्टकरसः 124

उदयभास्कररसः.. 124

रौद्ररसः 124

नित्योदितरसः... 125

अर्शकुठाररसः.. 125

विद्याधररसः... 126

वङ्गेश्वररसः.. 126

उदरारिरसः... 127

जलोदरारिरसः 127

नाराचरसः... 127

इच्छाभेदिरसः... 128

७.सप्तमोऽध्यायः... 129

|| रसायनगुटिकाकथनम् ||... 129

रसायनाधिकारः 129

गन्धामृतरसायनम् 130

हेमसुन्दररसः 130

मृतसंजीवनी गुटिका 130

वीर्यरोधिनी गुटिका 132

८.अष्टमोऽध्यायः 134

|| नेत्राञ्जनकेशरञ्जनम् || 134

अञ्जनविधिः 134

वर्तिप्रमाणम् (१) 134

नेत्रामयविनाशनाञ्जनम् 134

नयनामृतानञ्जनम् 135

दृष्टिदाञ्जनम् 135

शङ्खाद्यञ्जनम् 135

अपामार्गशिखाद्यञ्जनम् 135

दन्तादिवर्तिः 136

तुत्थाञ्जनम् 136

चन्द्रोदयावर्तिः 136

प्रत्यञ्जनम् 137

नेत्ररोगप्रणाशः 137

केशरञ्जनम् 137

पलितनाशनम् (१) 138

पलितनाशनम् (२) 138

शुक्लीकरणम् 139

९.नवमोऽध्यायः 140

|| वीर्यस्तम्भनबालतन्त्रम् || 140

वीर्यस्तम्भनम् (१) 140

वीर्यस्तम्भनम् (२) 140

वीर्यस्तम्भनम् (३) 140

वीर्यस्तम्भनम् (४) 140

वीर्यस्तम्भनम् (५) 141

वीर्यस्तम्भनम् (६) 141

वीर्यस्तम्भनम् (७) 141

वीर्यस्तम्भनम् (८) 141

वीर्यस्तम्भनम् (९) 141

स्थूलीकरणम् 142

ध्वस्तीकरणम् 142

षण्ढत्वकरणम् 142

षण्ढत्वनाशनम् 142

स्त्रीद्रावणम् 143

स्त्रीवशीकरणम् 143

स्त्रीवशीकरणयन्त्रम् 143

स्त्रीवशीकरणम् (१) 144

स्त्रीवशीकरणम् (२) 144

भगसङ्कोचनम् 145

लोमशातनम् (१) 145

लोमशातनम् (२) 145

विद्वेषकरणम् (१) 145

विद्वेषकरणम् (२) 146

स्तनदृढीकरणम् (१) 146

स्तनदृढीकरणम् (२) 146

वन्ध्याकरणम् (१) 146

वन्ध्याकरणम् (२) 146

वन्ध्याकरणम् (३) 147

वन्ध्याकरणम् (४) 147

वन्ध्यात्वनिवारणम् (१) 147

वन्ध्यात्वनिवारणम् (२) 147

वन्ध्यात्वनिवारणम् (३) 147

वन्ध्यात्वनिवारणम् (४) 148
वन्ध्यात्वनिवारणम् (५) 148
वन्ध्यात्वनिवारणम् (६) 149
वन्ध्यात्वनिवारणम् (७) 149
वन्ध्यात्वनिवारणम् (८) 150
वन्ध्यात्वनिवारणम् (९) 150
वन्ध्यात्वनिवारणम् (१०) 151
गर्भस्तम्भनम् (१) 151
गर्भस्तम्भनम् (२) 152
सुखप्रसवोपायः (१) 152
सुखप्रसवोपायः (२) 152
बालतन्त्रम् 152
मन्दा योगिनी 152
सुनन्दा योगिनी 153
पूतना योगिनी 153
बिडाली योगिनी 153
नर्तकी योगिनी 154
शकुनी योगिनी 154
शुष्काशिवा योगिनी 154

जृम्भका योगिनी 154
अचिन्ता योगिनी 154
कापालिका योगिनी 155
लिप्सिता योगिनी 155
पीतली योगिनी 155
भद्रकाली योगिनी 156
तारा योगिनी 156
शर्वरी योगिनी 156
कुमारी योगिनी 156
पूजाविधिबलिदानम् 157
१०.दशमोऽध्यायः 158
||कालविज्ञानछायापुरुषविज्ञानम् || 158
कालविज्ञानम् 158
दूताज्ज्ञानम् 158
अरिष्टलक्षणम् (१) 159
अरिष्टलक्षणम् (२) 159
अरिष्टलक्षणम् (३) 160
अरिष्टलक्षणम् (४) 160
अरिष्टलक्षणम् (५) 161

अरिष्टलक्षणम् (६) 161
अरिष्टलक्षणम् (७) 161
अरिष्टलक्षणम् (८) 161
अरिष्टलक्षणम् (९) 161
मासारिष्टकथनम् 162
दिनारिष्टकथनम् 164
छायापुरुषलक्षणम् 165
अरिष्टदर्शनम् 166
छायापुरुषसाधनफलम् 166
उपसंहारपुष्पिका 167
परिशिष्टम् 168
१. सदोषपाठाः 168
२.**अधिकपाठाः/भिन्नपाठाः** 171
३.पादसूची 172
सन्दर्भग्रन्थसूची 245

१.प्रथमोऽध्यायः

|| रसशोधनप्रकरणकथनम् ||

श्रीगणपतिस्तुतिः

यद्गण्डमण्डलगलन्मधुवारिबिन्दु[1]-

पानालसातिनिभृतां ललितालिमाला ।

सद्गुञ्जितेन[2] विनिहन्ति नवेन्द्रनील-

शङ्कां स वो गणपतिः शिवमातनोतु ॥ १.१ ॥

श्रीशारदास्तुतिः

इन्दीवरी भवति यच्च[3]रणारविन्द-

द्वन्द्वे पुरन्दरपुरस्सर[4]देवतानाम् ।

वन्दारुतां कलयतां सुकिरीटकोटिः

श्रीशारदा भवतु सा भवपारदा[5] वः ॥ १.२ ॥

ग्रन्थारम्भः

श्रीवैद्यनाथतनयः सुनयः सुशीलः

---

[1] ग- बिन्दुः ...अपपाठः |

[2] क,ग- यद्गुञ्जितेन

[3] ग- यच्च चरणा....अधिकः पाठः |

[4] ख- ..पुरःसर.. इत्यपि साधुपाठः |

[5] क- भवपारदाय..... | ग- भव पारदाय ....अपपाठः |

श्रीशालिनाथ इति विश्रुतनामधेयः ।

तेनावलोक्य विधिवद्विविधप्रबन्धा-

नारभ्यते[1] सुकृतिना रसमञ्जरीयम् ॥ १.३ ॥

सन्मधुव्रतं वृन्दानां सततं चित्तहारिणी ।

अनेकरसपूर्णेयं क्रियते रसमञ्जरी ॥ १.४ ॥

पारदप्रकरणम्

हरति सकलरोगान्मूर्छितो यो नराणां

वितरति किल बद्धः खेचरत्वं जवेन ।

सकलसुरमुनीन्द्रैर्वन्दितं शम्भुबीजं

स जयति भवसिन्धोः[2] पारदः पारदोऽयम् ॥ १.५ ॥

शुष्केन्धनमहाराशिं यद्वद्दहति पावकः ।

तद्वद्दहति सूतोऽयं रोगान् दोषत्रयोद्भवान् ॥ १.६ ॥[3]

तेजो मृगाङ्कमौलेः सोढुं यन्नैव तेजसां पुञ्जैः ।

अजरामरतां वितरति कल्पतरुं तं[4] रसेश्वरं वन्दे ॥ १.७ ॥

---

[1] क,ग- ..प्रबंधानारम्भते .....अपपाठः |

[2] क, ग- भवसिन्धुः

[3] ख- यो न वेत्ति कृपाराशिं..इत्यस्य पश्चात् १.८ पठ्यते |

[4] क, ग- च

यो न वेत्ति कृपाराशिं रसं हरिहरात्मकम्[1] ।

वृथा चिकित्सां कुरुते स वैद्यो हास्यतां व्रजेत् ॥ १.८ ॥

गुरुसेवामाहात्म्यम्

गुरुसेवां विना कर्म यः कुर्यान्मूढचेतनः[2] ।

स याति निष्फलत्वं हि स्वप्नलब्धं[3] यथा धनम्[4] ॥ १.९ ॥

विद्यां ग्रहीतु[5]मिच्छन्ति चौर्यच्छद्मबलादिना ।

न तेषां सिध्यते किञ्चिन्मणिमन्त्रौषधादिकम् ॥ १.१० ॥

गुरुलक्षणम्

मन्त्रसिद्धो महावीरो निश्चलः शिववत्सलः ।

देवीभक्तः सदा धीरो देवतायागतत्परः ॥ १.११ ॥

सर्वशास्त्रार्थतत्त्वज्ञः कुशलो रसकर्मणि ।

एतल्लक्षणसंयुक्तो रसविद्यागुरुर्भवेत् ॥ १.१२ ॥

शिष्यलक्षणम्

शिष्यो निजगुरोर्भक्तः सत्यवक्ता दृढव्रतः ।

---

[1] क, ग- रसहरिहरात्मकम्

[2] क, ग- मूढचेतसः

[3] क, ग -स्वप्नलब्धधनं

[4] क, ग- यथा

[5] क,ग- गृहीतुम् .....अपपाठः ।

निरालस्यः स्वधर्मज्ञो देव्याराधनतत्परः ॥ १.१३ ॥

पारदनामानि

शिवबीजं सूतराजः पारदश्च रसेन्द्रकः ।

एतानि रसनामानि तथान्यानि शिवे यथा ॥ १.१४ ॥

पारदलक्षणम्

अन्तःसुनीलो बहिरुज्ज्वलो

यो[1] मध्याह्नसूर्यप्रतिमप्रकाशः ।

शस्तोऽथ[2] धूम्रः परिपाण्डुरश्च

चित्रो न योज्यो रसकर्मसिद्धये ॥ १.१५ ॥

दोषमुक्तो यदा सूतस्तदा मृत्युरुजापहः ।

साक्षादमृतमेवैष दोषयुक्तो रसो विषम् ॥ १.१६ ॥

पारददोषाः

नागो वङ्गोऽग्निचाञ्चल्य[3]मसह्यत्वं विषं गिरिः ।

मलान्येते[4] च विज्ञेया दोषाः पारदसंस्थिताः ॥ १.१७ ॥

जाड्यं कुष्ठं महादाहं वीर्यनाशं च मूर्च्छनाम् ।

---

[1] क,ग- वा

[2] ख- शस्तोऽप्यधूम्रः

[3] क, ग- चापल्य...

[4] क,ग- मला ह्येते ...अपपाठः ।

मृत्युं स्फोटं रोगपुञ्जं कुर्वन्त्येते क्रमान्नृणाम् ॥ १.१८ ॥

पारदशोधनविधिः

अथातः सम्प्रवक्ष्यामि पारदस्य च शोधनम् ।

रसो ग्राह्यः सुनक्षत्रे पलानां शतमात्रकम् ॥ १.१९ ॥

पञ्चाशत्पञ्चविंशद्वा दशपञ्चैकमेव वा ।

पलादूनं न कर्तव्यं रससंस्कारमुत्तमम् ॥ १.२० ॥

पलत्रयं चित्रकसर्षपाणां कुमारि[1]कन्याबृहतीकषायैः ।

दिनत्रयं मर्दितसूतकस्तु विमुच्यते पञ्चमलादिदोषैः ॥ १.२१ ॥

इष्ट[2]कारजनीचूर्णैः षोडशांशं रसस्य च ।

मर्दयेत्तं तथा खल्वे जम्बीरोत्थद्रवैर्दिनम् ॥ १.२२ ॥

काञ्जिकैः क्षालयेत्सूतं नागदोषं विमुञ्चति ।

विशालाङ्कोलचूर्णेन वङ्गदोषं विमुञ्चति ॥ १.२३ ॥

राजवृक्षो मलं हन्ति पावको हन्ति पावकम् ।

चाञ्चल्यं[3] कृष्णधत्तूरस्त्रिफला विषनाशिनी ॥ १.२४ ॥

कटुत्रयं गिरिं हन्ति असह्यत्वं त्रिकण्टकः ।

---

[1] क, ग- कुमारी

[2] क,ग- इष्टि...

[3] क,ग- चापल्यं

प्रतिदोषं पलांशेन तत्र सूतं सकाञ्जिकम् ‖ १.२५ ‖

सुवस्त्रगालितं खल्वे सूतं क्षिप्त्वा विमर्दयेत् ।

उद्धृत्य चारनालेन मृद्भाण्डे क्षालयेत्सुधीः ‖ १.२६ ‖

सर्वदोषविनिर्मुक्तः सप्तकञ्चुकवर्जितः ।

जायते शुद्धसूतोऽयं योजयेद्रसकर्मसु[1] ‖ १.२७ ‖

रसस्य दशमांशं तु गन्धं दत्त्वा विमर्दयेत् ।

जम्बीरोत्थद्रवैर्यामं पात्यं[2] पातनयन्त्रके ‖ १.२८ ‖

पुनर्मर्द्यं पुनः पात्यं सप्तवारं विशुद्धये ।

युक्तं सर्वस्य सूतस्य तप्तखल्वे विमर्दनम् ‖ १.२९ ‖

तप्तखल्वम्

अजाशकृत्तुषाग्निं तु भूगर्भे त्रितयं क्षिपेत् ।

तस्योपरि स्थितं खल्वं तप्तखल्वमिदं स्मृतम् ‖ १.३० ‖

पारदशोधनम् (२)

कुमार्याश्च निशाचूर्णैर्दिनं सूतं विमर्दयेत् ।

पातयेत्पातनायन्त्रे सम्यक्शुद्धो भवेद्रसः ‖ १.३१ ‖

---

[1] क,ग-...सर्वकर्मसु

[2] ख- पाच्यं

पारदशोधनम् (३)

श्रीखण्डदेवदारू च[1] काकतुण्डीजयाद्रवैः ।

कर्कोटीमुशली[2]कन्याद्रवं दत्त्वा विमर्दयेत् ॥ १.३२ ॥

दिनैकं मर्दयेत्पश्चाच्छुद्धं च विनियोजयेत् ।

पारदशोधनम् (४)

अथवा हिङ्गुलात्सूतं ग्राहयेत्स निगद्यते[3] ॥ १.३३ ॥

जम्बीरनिम्बुनीरेण मर्दितं हिङ्गुलं दिनम् ।

ऊर्ध्वपातनयन्त्रेण ग्राह्यः स्यान्निर्मलो रसः ॥ १.३४ ॥

कञ्चुकैर्नागवङ्गाद्यैर्निर्मुक्तो रसकर्मणि ।

विना कर्मकृतेनैव[4] सूतोऽयं सर्वकार्यकृत्[5] ॥ १.३५ ॥

सर्वसिद्धमतमेतदीरितं

सूतशुद्धिकरमद्भुतं परम् ।

अल्पकर्मविधिभूरिसिद्धिदं

देहलोहकरणे हि शस्यते ॥ १.३६ ॥

---

[1] क,ग-...देवदारुश्च

[2] क,ग-...मुसली..

[3] क,ग- ग्राहयेत्तन्निगद्यते

[4] क,ग- कर्माष्टकेनैव

[5] क,ग- सर्वकर्मकृत्

संस्कारहीनं खलु सूतराजं यः

सेवते तस्य करोति बाधाम् ।

देहस्य नाशं विविधं च कुष्ठं

कष्टं च रोगाञ्जनयेन्नराणाम् ॥ १.३७ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां रसशोधनप्रकरणकथनं

नाम प्रथमोऽध्यायः || १ ||

****

२. द्वितीयोऽध्यायः

|| रसजारणमारणकथनम् ||

अथातः सम्प्रवक्ष्यामि रसजारणमुत्तमम् ।

अथाजीर्णमबीजं च सूतकं यस्तु घातयेत् ॥ २.१ ॥

ब्रह्महा स दुराचारी मम द्रोही महेश्वरि ।

तस्मात्सर्वप्रयत्नेन जारितं मारयेद्रसम् ॥ २.२ ॥

षड्गुणजारणम्

प्रक्षिप्य तोयं मृत्कुण्डे तस्योपरि शरावकम् ।

संचूर्णं मेखलायुक्तं स्थापयेत्तस्य चान्तरे ॥ २.३ ॥

रसं क्षिप्त्वा गन्धकस्य रजस्तस्योपरि क्षिपेत् ।

समं भागं ततो दद्याच्छरावेण पिधापयेत् ॥ २.४ ॥

लघ्वीयसीं भस्ममुद्रां ततः कुर्याद्भिषग्वरः ।

आरण्योपलकैः सम्यक्चतुर्भिः पुटमाचरेत् ॥ २.५ ॥

एवं पुनः पुनर्गन्धं दत्त्वा दत्त्वा भिषग्वरः ।

सम्यक्कुर्वीत सूतस्य देवि षड्गुणजारणम् ॥ २.६ ॥

सुवर्णजारणम्

शास्यो रसः स्यात्पटुशिग्रुतुत्थैः सराजिकैर्व्योषणकैस्त्रिरात्रम् ।

पिष्टस्ततः स्विन्नतनुः सुवर्णमुख्यानयं खादति सर्वधातून् ॥ २.७ ॥

अथवा बिडयोगेन शिखिपित्तेन लेपितम् ।

चरेत्सुवर्णं रसराट्तप्तखल्वे यथासुखम् ॥ २.८ ॥

निर्दग्धशंखचूर्णं च रविक्षीरेण संप्लुतम् ।

पुटितं शतशो देवि प्रशस्तं जारणं विदुः ॥ २.९ ॥

स्वर्णाभ्रसर्वलोहानि यथेष्टानि च जारयेत् ।

अनेन विधिना[1] सूतं चतुःषष्ट्यंशकादिना ।

द्वात्रिंशत्षोडशांशेन जारयेत्कनकं बुधः ॥ २.१० ॥

रसमारणम्

द्विपलं शुद्धसूतं च सूतार्धं शुद्धगन्धकम् ।

कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम् ॥ २.११ ॥

रुद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत्पुटात्[2] ।

रसभस्मविधिः (१)

भुजङ्गवल्लीनीरेण मर्दितं पारदं दृढम् ॥ २.१२ ॥

कर्कोटीकन्दमृन्मूषासम्पुटस्थं पुटे गजे ।

भस्म तद्योगवाहि स्यात्सर्वकर्मसु योजयेत् ॥ २.१३ ॥

---

[1] क,ग- अनेकविधिना

[2] क,ग- पुटान्

रसभस्मविधिः (२)

श्वेताङ्कोलजटावारि मर्द्यः सूतो दिनत्रयम् ।

पुटितश्चाम्भ[1]मूषायां सूतो भस्मत्वमाप्नुयात् ॥ २.१४ ॥

प्रत्यहं रक्तिकाः पञ्च भक्षयन्[2] मधुसर्पिषा ।

को वा तस्य गुणान् वक्तुं भुवि शक्नोति मानवः ॥ २.१५ ॥

रससिन्दूरनिर्माणम् (१)

पलमात्रं[3] रसं शुद्धं तावन्मात्रं सुगन्धकम् ।

विधिवत्कज्जलीं कृत्वा न्यग्रोधाङ्कुरवारिभिः ॥ २.१६ ॥

भावनात्रितयं दत्त्वा स्थालीमध्ये निधापयेत् ।

विरच्य कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ॥ २.१७ ॥

दद्यात्तदनु मन्दाग्निं भिषग्यामचतुष्टयम् || २.१८ ||

जायते रससिन्दूरं तरुणारुणसन्निभम् ।

अनुपानविशेषेण करोति विविधान् गुणान् ॥ २.१९ ॥

रससिन्दूरनिर्माणम् (२)

गन्धकेन समः सूतो निर्गुण्डीरसमर्दितः ।

---

[1] क,ग- चान्ध..

[2] क,ग- भक्षयेत्

[3] क,ग- पलमत्र

पाचितो वालुकायन्त्रे रक्तं भस्म प्रजायते ॥ २.२० ॥

रससिन्दूरनिर्माणम् (३)

सूतार्द्धं गन्धकं शुद्धं माक्षिकोद्भूतसत्त्वकम् ।

गन्धतुल्यं विमर्द्याथ दिनं निर्गुण्डिकाद्रवैः ॥ २.२१ ॥

स्थापयेद्वालुकायन्त्रे काचकूप्यां[1] विपाचयेत् ।

अन्धमूषागतं वाथ वालुकायन्त्रके दिनम् ॥ २.२२ ॥

पक्वं संजायते भस्म दाडिमीकुसुमोपमम् ।

रससिन्दूरनिर्माणम् (४)

पृथक्समं समं कृत्वा पारदं गन्धकं तथा ॥ २.२३ ॥

नवसारं धूमसारं स्फटिकीं याममात्रके ।

निम्बुनीरेण संमर्द्य काचकूप्यां[2] विपाचयेत् ॥ २.२४ ॥

मुखे पाषाणपटिकां[3] दत्त्वा मुद्रां प्रलेपयेत् ।

सप्तभिर्मृत्तिकावस्त्रैः पृथक्संशोष्य वेष्टयेत् ॥ २.२५ ॥

सच्छिद्रायां मृदः स्थाल्यां कूपिकां संनिवेशयेत् ।

पूरयेत्सिकतापुरैरागलं मतिमान् भिषक् ॥ २.२६ ॥

---

[1] ख- ...कुप्यां ....अपपाठः |

[2] ख- काचकुप्यां ......अपपाठः |

[3] क,ग- पाषाणवटिकां

निवेश्य चुल्ल्यां दहनं मन्दमध्यखरं क्रमात् ।

प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतलमुद्धरेत् ॥ २.२७ ॥

स्फोटयित्वा पुनः स्थालीमूर्ध्वगं गन्धकं त्यजेत् ।

अधःस्थं[1] रससिन्दूरं सर्वकर्मसु योजयेत् ॥ २.२८ ॥

रससिन्दूरनिर्माणम् (५)

गन्धकं धूमसारं च शुद्धसूतं समं समम् ।

यामैकं मर्दयेत्खल्वे काचकूप्यां[2] निवेशयेत् ॥ २.२८ ॥

रुद्ध्वा द्वादशयामं तु वालुकायन्त्रगं पचेत् ।

स्फोटयेत्स्वाङ्गशीतं तमूर्ध्वलग्नं तु तं त्यजेत् ॥ २.३० ॥

अधःस्थं[3] मृतसूतं च सर्वयोगेषु योजयेत् ।

रससिन्दूरनिर्माणम् (६)

भागौ रसस्य त्रय एव भागा

गन्धस्य भागं पवनाशनस्य[4] ।

संमर्द्य गाढं सकलं सुभाण्डे तां

कज्जलीं काचकृते विदध्यात् ॥ २.३१ ॥

---

[1] क,ग- अधस्थं ....अपपाठः ।

[2] क,ग- काचकुप्यां .....अपपाठः ।

[3] क,ग- अधस्थं

[4] क,ग- पवनाशसस्य

संवेष्ट्य मृत्कर्पटकैः खटान्तां[1]

मुखे सुचूर्णां खटिकां च कृत्वा ।

क्रमाग्निना त्रीणि दिनानि पक्त्वा

तां वालुकायन्त्रगतां ततः स्यात् ॥ २.३२ ॥

बन्धूकपुष्पारुणमीशजस्य

भस्म प्रयोज्यं सकलामयेषु ।

निजानुपानैर्मरणं जरां च

निहन्ति वल्लक्रमसेवनेन ॥ २.३३ ॥

रससिन्दूरनिर्माणम् (७)

पक्वमूषागतं सूतं गन्धकं चाधरोत्तरम् ।

तुल्यं सुचूर्णितं कृत्वा काकमाचीद्रवं पुनः ॥ २.३४ ॥

द्वाभ्यां चतुर्गुणं देयं द्रवं मूषां निरुध्य च ।

पाचयेद्वालुकायन्त्रे क्रमवृद्धाग्निना दिनम् ॥ २.३५ ॥

आरक्तं जायते भस्म सर्वयोगेषु योजयेत् ।

रससिन्दूरनिर्माणम् (८)

अश्वगन्धादिवर्गेण रसं स्वेद्यं प्रयत्नतः ॥ २.३६ ॥

---

[1] क,ग- स्वयं तां

रसतुल्यं गन्धकं च मर्दयेत्कुशलो भिषक् ।

पाचयेद्रससिन्दूरं जायतेऽरुणसन्निभम् ॥ २.३७ ॥

श्रेष्ठं सर्वरसानां हि पुष्टिकामबलप्रदम् ॥ २.३८ ॥

इदमेवायुषो वृद्धिं कर्तुं नान्यदलं भवेत् ।

विनापि स्वर्णराजेन मुनिभिः परिकीर्तितम् ॥ २.३९ ॥

टङ्कणं मधु लाक्षाथ ऊर्णा गुञ्जायुतो रसः ।

मर्दयेद्भृगजैर्दावै[1]र्दिनैकं वा धमेत्पुनः ॥ २.४० ॥

ध्मातो भस्मत्वमायाति शुद्धः कर्पूरसन्निभः ।

रसकर्पूरः (१)

खटीष्ट्यगैरिका[2] वल्मीमृत्तिका सैन्धवं समम् ॥ २.४१ ॥

भागद्वयमितं[3] गन्धं[4] रसं भागद्वयं[5] स्मृतम् ।

हण्डिकायां विनिक्षिप्य[6] पार्श्वे पार्श्वे च खर्पटान् ॥ २.४२ ॥

दग्ध्वाथ हण्डिकां दत्त्वा द्विरष्टप्रहरं पचेत् ।

---

[1] क,ग-...भृङ्गजैर्द्रावै....

[2] क,ग- खटीष्टिगैरिका

[3] क,ग- भागद्वयमितो

[4] क,ग- गन्धो

[5] क,ग- रसभागद्वयं

[6] क,ग- विनिःक्षिप्य

मृतसूतं तु गृह्णीयाच्छुद्ध[1]कर्पूरसन्निभम् ॥ २.४३ ॥[2]

रसकर्पूरः (२)

पिष्टं पांशुपटुप्रगाढममलं वज्राम्बुना[3]नेकशः

सूतं धातुयुतं खटीकवलितं तं सम्पुटे रोधयेत् ।

अन्तःस्थं लवणस्य तस्य च तले प्रज्वाल्य वह्निं

हठाद्भस्म ग्राह्यमथेन्दुकुन्दलवलं[4] भस्मोपरिस्थं शनैः ॥ २.४४ ॥

तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रभुक्तं नृणा-

मूर्ध्वं रेचयति द्वियाममसकृत्पेयं जलं शीतलम् ।

एतद्धन्ति च वत्सरावधि विषं षाण्मासिकं मासिकं

शैलोत्थं गरलं मृगेन्द्रकुटिलोद्भूतं च तात्कालिकम् ॥ २.४५ ॥

रसमूर्छनम् (१)

मेघनादवचाहिङ्गुलशुनैर्मर्दयेद्रसम् ।

नष्टदिष्टं[5] तु तद्गोलं हिङ्गुना वेष्टयेद्बहिः ॥ २.४६ ॥

---

[1] क,ग- च्छुद्धः .....अपपाठः |

[2] अ,ब, ख- नास्ति | क,ग- अधिकपाठः -
कल्कादिवेष्टितं कृत्वा निर्गिलेदुपदंशके ।

[3] क,ग- वज्र्यम्बुना

[4] ग- ...धवलं

[5] ग- नष्टपिष्टं

पचेल्लवणयन्त्रस्थं दिनैकं चण्डवह्निना ।

ऊर्ध्वलग्नं समादाय दृढं वस्त्रेण वेष्टयेत् ॥ २.४७ ॥

ऊर्ध्वाधो गन्धकं तुल्यं दत्त्वा सौम्यानले पचेत् ।

जीर्णे गन्धे पुनर्देयं षड्भिर्वारैः समं समम् ॥ २.४८ ॥

षड्गुणे गन्धके जीर्णे मूर्छितो रोगहा भवेत् ।

रसमूर्छनम् (२)

लोहपात्रेऽथवा ताम्रे पलैकं शुद्धगन्धकम् ॥ २.४९ ॥

मृद्वग्निना द्रुते तस्मिञ्छुद्धं सूतपलत्रयम् ।

क्षिप्त्वाथ चालयेत्किंचिल्लोहदर्व्या पुनः पुनः ॥ २.५० ॥

गोमयं कदलीपत्रं तस्योपरि च ढालयेत् ।

इत्येवं गन्धबद्धं च सर्वरोगेषु योजयेत् ॥ २.५१ ॥

गुणकथनम्

मारितो देहसिद्ध्यर्थं मूर्छितो व्याधिघातने ।

रसभस्म क्वचिद्रोगे देहार्थे[1] मूर्छितं क्वचित् ।

बद्धो द्वाभ्यां प्रयुञ्जीत शास्त्रदृष्टेन कर्मणा ॥ २.५२ ॥

[1] क,ग- देहार्थं

बद्धपारदलक्षणम्

अक्षयी च लघुर्द्रावी तेजस्वी निर्मलो गुरुः ॥[1]

स्फुटनं[2] पुनरावृत्तिर्बद्धसूतस्य लक्षणम् ॥ २.५३ ॥[3]

मूर्छितपारदलक्षणम्

कज्जलाभो यदा सूतो विहाय घनचापलम् ।[4]

दृश्यतेऽसौ तदा ज्ञेयो मूर्छितः सुतरां बुधैः ॥ २.५४ ॥

मृतपारदलक्षणम्

आर्द्रत्वं च घनत्वं च चापल्यं गुरुतैजसम्[5] ।[6]

यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥ २.५५ ॥[7]

निर्बीजबद्धपारदः

रसस्तु पादांशसुवर्णजीर्णः पिष्टीकृतो गन्धकयोगतश्च ।

तुल्यांशगन्धैः पुटितं क्रमेण निर्बीजनामाखिलरोगहन्ता ॥ २.५६ ॥[8]

---

[1] ख- २.५३

[2] ख- फुटनं

[3] ख- २.५४पू.

[4] ख- २.५४उ.

[5] ख- गुप्ततैजसम्

[6] ख- २.५५

[7] ख- २.५६पू.

[8] ख- २.५७पू.

सबीजबद्धपारदः

बीजीकृतैरभ्रकसत्त्वहेमतारार्ककान्तैः सह साधितोऽयम्[1] ।

पुनस्ततः षड्गुणगन्धचूर्णैः सबीजबद्धोऽप्यधिकप्रभावः ॥ २.५७ ॥

रसवीर्यविपाकेषु विद्यात्[2] सूतं सुधामयम् ।

सेवितोऽसौ सदा देहे रोगनाशाय कल्पते ॥ २.५८ ॥

ककाराष्टकम्

कूष्माण्डं कर्कटीं चैव कलिङ्गं कारवेल्लकम् ।

कुसुम्भिकं च कर्कोटीं कदलीं काकमाचिकाम् ।

ककाराष्टकमेतद्धि वर्जयेद्रसभक्षकः ॥ २.५९ ॥

हितं मुद्गाम्बुदुग्धाज्यं शाल्यन्नं च विशेषतः ॥ २.५९ ॥[3]

शाकं पुनर्नवायास्तु मेघनादं च चिल्लिकाम् ।

सैन्धवं नागरं मुस्तं पद्मं मूलानि[4] भक्षयेत् ॥ २.६० ॥[5]

अभ्यङ्गं मैथुनं स्नानं यथेष्टं च सुखाम्बुना ।

---

[1] ख- साधितोयः ......अपपाठः ।

[2] ख- विंद्यात् ....अपपाठः ।

[3] ख- २.६१पू.

[4] क,ग- पद्ममूलानि

[5] ख- २.६२पू.

रूपयौवनसम्पन्नां सानुकूलां प्रियां भजेत् ॥ २.६१ ॥[1]

बुद्धिः प्रज्ञा बलं कान्तिः प्रभा चैवं वयस्तथा ।

वर्धन्ते सर्व एवैते रससेवाविधौ नृणाम् ॥ २.६२ ॥[2]

यस्य रोगस्य यो योगस्तेनैव सह योजयेत् ।

रसेन्द्रो हरते रोगान्नरकुञ्जरवाजिनाम् ॥ २.६३ ॥[3]

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां रसस्य जारणमारणकथनं नाम द्वितीयोऽध्यायः ||[4]

****

[1] ख- २.६३पू.

[2] ख- २.६४पू.

[3] ख- २.६४उ.

[4] नास्ति ।

३. तृतीयोऽध्यायः

|| उपरसशोधनमारणकथनम् ||

उपरसाः

गन्धकं वज्रवैक्रान्तं गगनं तालकं शिलाम् ।

खर्परं शिखि तुत्थं[1] च विमला हेममाक्षिकम् ॥ ३.१ ॥

कासीसं कान्तपाषाणं वराटाञ्जनहिङ्गुलम् ।

कङ्कुष्टं[2] शंखभूनागं टङ्कणं तु शिलाजतु ।

एते उपरसाः प्रोक्ताः शोध्या द्रव्याश्च[3] मारयेत् ॥ ३.२ ॥

गन्धकोत्पत्तिः

तत्रादौ गन्धकोत्पत्तिं शोधनं त्वथ कथ्यते ॥ ३.३ ॥

श्वेतद्वीपे पुरा देव्याः क्रीडन्त्याः प्रसृतं रजः ।

क्षीरार्णवे तु स्नाताया दुकूलं रजसान्वितम् ॥ ३.४ ॥

धौतं यत्सलिले तस्मिन् गन्धवद्गन्धकं स्मृतम् ।

चतुर्धा गन्धकः प्रोक्तो रक्तपीतसितासितैः ॥ ३.५ ॥

रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ।

---

[1] क,ग- शिखितुत्थं

[2] क,ग- कङ्कुष्ठं

[3] ख- शोध्याद्रव्याश्च, ग-शोध्या द्राव्याश्च

व्रणादिलेपने श्वेतः श्रेष्ठः कृष्णस्तु दुर्लभः ॥ ३.६ ॥

अशुद्धगन्धः कुरुतेऽतिकुष्ठं तापं भ्रमं पित्तरुजं करोति ।

रूपं सुखं वीर्यबलं निहन्ति तस्मात्सुशुद्धं विनियोजनीयम् ॥ ३.७ ॥

गन्धकशोधनम् (१)

साज्यभाण्डे पयः क्षिप्त्वा मुखं वस्त्रेण बन्धयेत् ।

तत्पृष्ठे गन्धकं क्षिप्त्वा शरावेणावरोधयेत् ॥ ३.८ ॥

भाण्डं निक्षिप्य भूम्यां तदूर्ध्वं देयं पुटं लघु ।

ततः क्षीरेण गन्धं च शुद्धं योगेषु योजयेत् ॥ ३.९ ॥

गन्धकशोधनम् (२)

गन्धकं शोधयेद्दुग्धे दोलायन्त्रेण तत्त्ववित् ।

तेन शुद्धो भवत्येष धातूणां प्राणमूर्च्छकः ॥ ३.१० ॥

गन्धकशोधनम् (३)

घृतयुक्तमयोदर्व्यां गन्धं वह्नौ प्रगालयेत् ।

एकीभूतं ततो गन्धं दुग्धमध्ये परिक्षिपेत् ॥ ३.११ ॥

तेन शुद्धो[1] भवेद्गन्धः सर्वयोगेषु योजयेत् ।

शोधितो रसराजः स्याज्जरामृत्युरुजापहः ।

अग्निसंदीपनं श्रेष्ठं वीर्यवृद्धिं करोति च ॥ ३.१२ ॥

---

[1] ख- शुद्धौ

गन्धकतैलम्

अर्कक्षीरैः स्नुहीक्षीरैर्वस्त्रं लेप्यं तु सप्तधा ।

गन्धकं नवनीतेन पिष्ट्वा वस्त्रं लिपेत्तु तत् ॥ ३.१३ ॥

तद्वर्तिर्ज्वलिता वंशैर्धृता धार्या त्वधोमुखी ॥ ३.१४ ॥

तैलं पतत्यधो भाण्डे ग्राह्यं योगेषु योजयेत् ।

अग्निसंदीपनं श्रेष्ठं वीर्यवृद्धिं करोति च ॥ ३.१५ ॥

वज्रजातयः

श्वेतपीता रक्तकृष्णा[1] द्विजाद्या वज्र[2]जातयः ।

पुंस्त्रीनपुंसकं चेति लक्षणेन तु लक्षयेत् ॥ ३.१६ ॥

वृत्ताः फलकसम्पूर्णास्तेजोवन्तो बृहत्तराः ।

पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥ ३.१७ ॥

रेखाबिन्दुसमायुक्ताः षट्कोणास्ताः स्त्रियः स्मृताः ।

त्रिकोणाः पत्रवद्दीर्घा विज्ञेयास्ते नपुंसकाः ॥ ३.१८ ॥

सर्वेषां पुरुषाः श्रेष्ठा वेधका रसबन्धकाः ।

स्त्रीवज्र[3]देहसिद्ध्यर्थं क्रामणं स्यान्नपुंसकम् ॥ ३.१९ ॥

---

[1] ख- श्वेतपीतारक्तकृष्णा

[2] दरोऽस्त्रियां भये श्वभ्रे वज्रोऽस्त्री हीरको पवौ || (Amara-simha, 1990), अमर.३.३.१८५.१.२ ||, a diamond [(MONIER-WILLIAMS, 1899),pg.913]

[3] ख- स्त्रीवज्रं

विप्रो रसायने प्रोक्तः क्षत्रियो रोगनाशने ।

वादादौ वैश्यजातीयो वयःस्तम्भे तुरीयकः ॥ ३.२० ॥

स्त्री तु स्त्रिये प्रदातव्या क्लीबे क्लीबं तथैव च ।

सर्वेषां सर्वदा योज्याः पुरुषा बलवत्तराः ॥ ३.२१ ॥

अशोधितवज्रदोषः

पाण्डुरोगं पार्श्वपीडां किलासं दाहसन्ततिम् ।

रोगानीकं गुरुत्वं च धत्ते वज्रमशोधितम् ॥ ३.२२ ॥

वज्रशोधनम् (१)

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितम् ।

सप्ताहं कोद्रव[1]क्वाथे कौलत्थे[2] विमलं भवेत् ॥ ३.२३ ॥

वज्रशोधनम् (२)

व्याघ्रीकन्दगतं वज्रं मृदा लिप्तं पुटे पचेत् ।

अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ।

---

[1] ख- कौद्रव... अपपाठः | कोद्रव, m, a species of grain eaten by the poor (Paspalum scrobiculatum), [(MONIER-WILLIAMS, 1899),pg.313], सु.सू.४६.२३, सु.चि.१७.३७;२०.३०; सु.क.८.७३ [(सुश्रुत, 2010)]

[2] ख- कोलत्थे.....अपपाठः | कौलत्थ, सु.चि.८.३८; सु.क.५.१८,सु.उ.२६.२३;४३.१३ [(सुश्रुत, 2010)]

वज्रीक्षीरेण[1] वा सिञ्चेत्कुलिशं[2] विमलं भवेत् ॥ ३.२४ ॥

वज्रमारणम् (१)

त्रिवर्षारूढकार्पासमूलमादाय पेषयेत् ।

त्रिवर्षनागवल्ल्याश्च द्रावेण तं प्रपेषयेत् ॥ ३.२५ ॥

तद्गोलके क्षिपेद्वज्रं रुद्ध्वा गजपुटे पचेत् ।

एवं सप्तपुटं कृत्वा कुलिशं म्रियते ध्रुवम् ॥ ३.२६ ॥

वज्रमारणम् (२)

कांस्यपात्रे तु भेकस्य मूत्रे वज्रं सुभावयेत् ।

त्रिःसप्तकृत्वः संतप्तं वज्रमेव[3] मृतं भवेत् ॥ ३.२७ ॥

वज्रभस्म (३)

त्रिःसप्तकृत्वः संतप्तं खरमूत्रेण सेचयेत् ।

मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत् ॥ ३.२८ ॥

प्रध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण वै ।

भस्मीभवति तद्भुक्तं वज्रवत्कुरुते तनुम् ॥ ३.२९ ॥

आयुष्यं सौख्यजनकं बलदं रूपदं तथा ।

---

[1] ख- वज्रक्षीरेण | वज्री f.a kind of Euphorbia Antiquorum [(MONIER-WILLIAMS, 1899),pg.913]

[2] A diamond [(MONIER-WILLIAMS, 1899),pg.296]

[3] ख- वज्रमेवं

रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम् ॥ ३.३० ॥

वैक्रान्तमारणम्

अष्टास्रिरष्टफलकः[1] षट्कोणो मसृणो गुरुः ।

शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते ॥ ३.३१ ॥

श्वेतो रक्तश्च पीतश्च नीलः पारावतच्छविः[2] ।

श्यामलः कृष्णवर्णश्च कर्बुरश्चाष्टधा हि सः ॥ ३.३२ ॥

वैक्रान्तशोधनम्

वैक्रान्तं वज्रवच्छुद्धं ध्मातं तं हयमूत्रके ।

हितं तद्भस्म संयोज्यं वज्रस्थाने विचक्षणैः ॥ ३.३३ ॥[3]

आयुःप्रदः सकलबन्धकरोऽतिवृष्यः

प्रज्ञाप्रदः सकलरोगसमूलहारी ।

दीप्ताग्निकृत्पविसमानगुणस्तरस्वी

वैक्रान्तकः खलु वपुर्बललोहकारी ॥ ३.३४ ॥[4]

वैक्रान्तसत्त्वपातनम्

वैक्रान्तं वज्रकन्दे च पेषयेद्वज्रवारिणा ।

---

[1] क- अष्टास्रश्चाष्टफलकः | ग- अष्टास्र चाष्टफलकः

[2] ख- नीलपारावतच्छविः

[3] ख- ३.३४

[4] ख- ३.३३

माहिषं नवनीतं च सक्षौद्रं पिण्डितं ततः ।

शोषयित्वा धमेत्सत्त्वमिन्द्रगोपसमं भवेत् ॥ ३.३५ ॥[1]

अभ्रकलक्षणम्

पिनाकं दर्दुरं नागं वज्रमभ्रं चतुर्विधम् ।

ध्मातं वह्नौ दलचयं पिनाकं विसृजत्यलम् ॥ ३.३६ ॥

फूत्कारं नागवत्कुर्याद्दुर्दुरं[2] **भेकशब्दवत् ।**

चतुर्थं च वरं ज्ञेयं न चाग्नौ विकृतिं व्रजेत् ॥ ३.३७ ॥

तस्माद्वज्राभ्रकं ग्राह्यं व्याधिवार्धक्यमृत्युजित् ।

अशुद्धाभ्रं निहन्त्यायुर्वर्धयेन्मारुतं कफम् ॥ ३.३८ ॥

अहतं छेदयेद्गात्रं मन्दाग्निकृमिवर्धकम्[3] **।**

अतः शुद्धाभ्रकं ग्राह्यं मन्दाग्निकृमिनाशनम् ॥ ३.३९ ॥[4]

धान्याभ्रककरणविधिः

पादांशशालिसंयुक्तमभ्रं बद्ध्वाथ कम्बले ।

त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेद्दृढम् ॥ ३.४० ॥

कम्बलाद्गलितं श्लक्ष्णं वालुकारहितं च यत् ।

---

[1] ख- ३.८८-८९

[2] ख- कुर्यादुदरं .....अपपाठः ।

[3] क,ग- ...वर्धनम्

[4] ख- ३.३८

तद्धान्याभ्रमिति प्रोक्तं सद्भिर्देहस्य सिद्धये ॥ ३.४१ ॥[1]

अभ्रकशोधनम् (१)

धमेद्वज्राभ्रकं वह्नौ ततः क्षीरेण सेचयेत् ।

भिन्नपत्रं तु तत्कृत्वा मेघनादाम्लयोर्द्रवैः ।

भावयेदष्टयामं तद्धान्याभ्रं कारयेत्सुधीः ॥ ३.४२ ॥

अभ्रकशोधनम् (२)

अथवा बदरीक्वाथे ध्मातमभ्रं विनिक्षिपेत् ।

मर्दितं पाणिना शुष्कं धान्याभ्रादतिरिच्यते ॥ ३.४३ ॥[2]

अभ्रकमारणम् (१)

धान्याभ्रकस्य भागैकं द्वौ भागौ टंकणस्य च ॥ ३.४४ ॥

पिष्ट्वा तदन्धमूषायां रुद्ध्वा तीव्राग्निना पचेत् ।

स्वभावशीतलं चूर्णं सर्वरोगेषु योजयेत् ॥ ३.४५ ॥[3]

अभ्रमारणम् (२)

धान्याभ्रकं दृढं मर्द्यमर्कक्षीरे दिनावधि ।

वेष्टयेद्भानुपत्रैश्च चक्राकारं तु कारयेत् ॥ ३.४६ ॥

कुञ्जराख्ये पुटे पाच्यं सप्तवारं पुनः पुनः ।

---

[1] ख- ३.४०

[2] ख-३.४१; आदौ अथवा बदरीक्वाथे... | तत् पश्चात् धमेद्वज्राभ्रकं वह्नौ इति पठ्यते |

[3] ख- ३.४४

ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम् ॥ ३.४७ ॥

म्रियते नात्र[1] सन्देहः[2] सर्वरोगेषु योजयेत् ।

अभ्रमारणम् (३)

धान्याभ्रकं समादाय मुस्तक्वाथैः पुटत्रये ॥ ३.४८ ॥

तद्वत्पुनर्नवाक्षीरैः[3] कासमर्दरसैस्तथा ।

नागवल्लीरसैर्युक्तं सूर्यक्षीरैः पृथक्पृथक् ॥ ३.४९ ॥

दिने दिने मर्दयित्वा क्वाथैर्वटजटोद्भवैः ।

दत्त्वा पुटत्रयं पश्चात्त्रिपुटं मुशलीजलैः ॥ ३.५० ॥

त्रिर्गोक्षुर[4]कषायेण त्रिः पुटेद्वानरीरसैः ।

मोचाकन्दरसैः पाच्यं त्रिवारं कोकिलाक्षकैः ॥ ३.५१ ॥

रसैः पुटेत्ततो धेनुक्षीरोदकं[5] पुटं मुहुः ।

दध्ना घृतेन मधुना स्वच्छया[6] सितया तथा ॥ ३.५२ ॥[7]

एकमेकं पुटं दद्यादभ्रस्यैवं मृतिर्भवेत् ।

---

[1] क,ग- नाम.....अपपाठः |

[2] ख- संदेहो ..... अपपाठः |

[3] क,ग- ..नवानीरैः

[4] क,ग- त्रिगोक्षुर...

[5] धेनुः क्षारोदकं

[6] ख- स्वेच्छया

[7] ख- ३.५१

सर्वरोगहरं व्योम जायते योगवाहकम् ॥ ३.५३ ॥[1]

कामिनीमददर्पघ्नं शस्तं पुंस्त्वोपवाहिनाम् ।

वृष्यमायुष्करं शुक्रवृद्धिसन्तानकारकम् ॥ ३.५४ ॥

अभ्रमारणम् (४)

दुग्धत्रयं कुमार्यम्बु गङ्गापत्रं नृमूत्रकम् ।

वटाङ्कुरमजारक्तमेभिरभ्रं सुमर्दितम् ॥ ३.५५ ॥

शतधा पुटितं भस्म जायते पद्मरागवत् ।

निश्चन्द्रकं भवेद्व्योम शुद्धदेहो रसायनम् ॥ ३.५६ ॥

निश्चन्द्रमारितं व्योम रूपं वीर्यं दृढां तनुम् ।

कुरुते नाशयेन्मृत्युं जरारोगकदम्बकम् ॥ ३.५७ ॥[2]

अभ्रकसत्त्वपातनम्

भावितं चूर्णितं त्वभ्रं दिनैकं काञ्जिकेन च ।

रम्भासूरणजैर्नीरैर्मूलकोत्थैश्च मेलयेत् ॥ ३.५८ ॥

तुर्यांशं टंकणेनेदं क्षुद्रमत्स्यैः समं पुनः ।

महिषीमलसम्मिश्रं विधायास्याथ गोलकम् ॥ ३.५९ ॥

खराग्निना धमेद्गाढं सत्त्वं मुञ्चन्ति कान्तिमत् ।

---

[1] ख- ३.५२

[2] ख- ३.५६

सत्त्वसेवी वयःस्तम्भं कृतशुद्धिर्लभेत्सुधीः ॥ ३.६० ॥[1]

अभ्रकद्रावणम्

अगस्तिपुष्पनिर्यासमर्दितं सूरणोदरे ।

गोष्ठभूस्थं नभोभासं जायते जलसन्निभम् ॥ ३.६१ ॥[2]

सर्वसत्त्वपातनविधिः

गुडपुरस्तथा लाक्षा पिण्याकं टंकणं तथा ।

ऊर्णा सर्जरसं चैव क्षुद्रमीनसमन्वितम् ॥ ३.६२ ॥

एतत्सर्वं तु संचूर्ण छागीदुग्धेन पिण्डिकाम् ।

कृत्वा ध्माता खराङ्गारैः सर्वसत्त्वानि पातयेत् ॥ ३.६३ ॥

पाषाणमृत्तिकादीनि सर्वलोहगतानि च ।

अन्यानि यान्यसाध्यानि व्योमसत्त्वस्य का कथा ॥ ३.६४ ॥

यत्रोपरस[3]भावोऽस्ति रसे तत्सत्त्वयोजनम् ।

कर्तव्यं तद्गुणाधिक्यं रसज्ञत्वं यदीच्छसि ॥ ३.६५ ॥[4]

भूनागसत्त्वपातनम्

सद्यो भूनागमादाय चारयेच्छिखिनं बुधः ।

---

[1] ख- ३.९०-९२

[2] ख- ३.९३

[3] क,ग- यदोपरस...

[4] ख- ३.९४-९७

अथवा कुक्कुटं वीरं कृत्वा मन्दिरमाश्रितम् ॥ ३.६६ ॥

मलं मूत्रं गृहीत्वा च संत्यज्य प्रथमांशकम् ।

आलोड्य क्षीरमध्वाज्यै[1]र्धमेत्सत्त्वार्थमादरात् ॥ ३.६७ ॥

मुञ्चन्ति ताम्रवत्सत्त्वं तन्मुद्राजलपानतः[2] ।

नश्यन्ति जङ्गमविषाण्यशेषाणि न संशयः ॥ ३.६८ ॥[3]

अशुद्धहरतालदोषाः

अशुद्धं तालमायुघ्नं कफमारुतमेहकृत् ।

वान्तिस्फोटाङ्गसंकोचं कुरुते तेन शोधयेत् ॥ ३.६९ ॥

हरतालशोधनमारणम्

शुद्धः स्यात्तालकः स्विन्नः कूष्माण्डसलिले ततः ।

चूर्णोदके पृथक्तैले भस्मीभूतो न दोषकृत् ॥ ३.७० ॥

तालको हरते रोगान् कुष्ठमृत्युरुजादिकान् ।

संशुद्धः कान्तिवीर्यं च कुरुते ह्यायुर्वर्धनम् ॥ ३.७१ ॥

हरतालमारणम्

पलमेकं शुद्धतालं कौमारीरसमर्दितम् ।

---

[1] क- क्षीरमध्वाज्यं, ग- क्षीरमध्वाज्य .....अपपाठः ।

[2] क,ग- ...पानजः

[3] ख- ३.८५-८८

शरावसम्पुटे क्षिप्त्वा यामान्द्वादशकं पचेत् ॥ ३.७२ ॥

स्वाङ्गशीतं समादाय तालकं तु मृतं भवेत् ।

गलत्कुष्ठं हरेच्चैव तालकं च न संशयः ॥ ३.७३ ॥

मनःशिलाशोधनम्

अगस्तिपत्रतोयेन भाविता सप्तवारकम् ।

शृङ्गवेररसैर्वापि विशुध्यति मनःशिला ॥ ३.७४ ॥

मनःशिलागुणाः

कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी परा ।

भूतावेशामयं हन्ति कासश्वासहरा शुभा ॥ ३.७५ ॥

रसकशोधनम्

नृमूत्रैः खरमूत्रैश्च सप्ताहं रसकं पचेत् ।

दोलायन्त्रेन संशोध्य ततः कार्येषु योजयेत् ॥ ३.७६ ॥

तुत्थशोधनम्

ओतोर्विष्ठासमं तुत्थं सक्षौद्रं टंकणाद्भिषक् ।

त्रिविधं पुटितं शुद्धं वान्तिभ्रान्तिविवर्जितम् ॥ ३.७७ ॥

तुत्थगुणाः

तुत्थकं कटु सक्षारं कषायं विषदं[1] लघु ।

---

[1] ग- विशदं

लेखनं भेदि[1] चक्षुष्यं कण्डूकृमिविषापहम् ॥ ३.७८ ॥

विमलशोधनम्

जम्बीरस्य रसे स्विन्ना मेषशृङ्गीरसेऽथवा ।

रम्भातोयेन वा पाच्यं घस्रं विमलशुद्धये ॥ ३.७९ ॥

माक्षिकशोधनम्

सिन्धूद्भवस्य भागैकं त्रिभागं माक्षिकस्य च ।

कृत्वा तदायसे पात्रे लोहदर्व्याथ चालयेत् ॥ ३.८० ॥

सिन्दूराभं भवेद्यावत्तावन्मृद्वग्निना पचेत् ।

सुभद्रं माक्षिकं विद्यात्सर्वयोगेषु योजयेत् ॥ ३.८१ ॥

माक्षिकमारणम्

माक्षिकस्य चतुर्थांशं दत्त्वा गन्धं विमर्दयेत् ।

ऊरुबूकस्य तैलेन ततः कार्या सुचक्रिका ॥ ३.८२ ॥

शरावसम्पुटे कृत्वा पुटेद्गजपुटेन च ।

सिन्दूराभं भवेद्भस्म माक्षिकस्य न संशयः ॥ ३.८३ ॥

माक्षिकगुणाः

माक्षिकं तिक्तमधुरं मेहार्शःक्षयकुष्ठनुत् ।

कफपित्तहरं बल्यं योगवाहि रसायनम् ॥ ३.८४ ॥

---

[1] ग- भेदी .....अपपाठः ।

कासीसशोधनम्

सकृद्भृङ्गाम्बुना स्विन्नं कासीसं निर्मलं भवेत् ॥ ३.८५ ॥

कासीसगुणाः

कासीसं शीतलं स्निग्धं स्विन्नं नेत्ररुजापहम् ।

पित्तापस्मारशमनं रसवद्गुणकारकम् ॥ ३.८६ ॥

कान्तपाषाणशोधनम्

लवणानि तथा क्षारौ शोभाञ्जनरसे[1] क्षिपेत् ।

अम्लवर्गयुते चादौ दिनमर्धं विभावयेत् ॥ ३.८७ ॥

तद्द्रवैर्दोलिका[2]यन्त्रे दिवसं पाचयेत्सुधीः ।

कान्तपाषाणशुद्धौ तु रसकर्म समाचरेत् ॥ ३.८८ ॥

वराटिका

पीताभा ग्रन्थिलाः पृष्ठे दीर्घवृत्ता वराटिकाः ।

सार्धनिष्कभराः श्रेष्ठा निष्कभाराश्च मध्यमाः ॥ ३.८९ ॥

पादोननिष्कभाराश्च कनिष्ठाः परिकीर्तिताः ।

रसवैद्यै[3]र्विनिर्दिष्टास्ताश्चराचरसंज्ञकाः ॥ ३.९० ॥

---

[1] ख- सोभाञ्जन.... अपपाठः | Moringa Pterygosperma (Its leaves, flowers and root are edible and are medicinally) [(MONIER-WILLIAMS, 1899),pg.1092], सु.चि.७.२४;१४.१३,सु.उ.११.८;४५.१९ [(सुश्रुत, 2010)]

[2] ख-..दोलका.......अपपाठः |

[3] ग- रसवैद्य....

वराटिकाशोधनम्

वराटा काञ्जिके स्विन्ना यामाच्छुद्धिमवाप्नुयात् ।

वराटिकागुणाः

परिणामादिशूलघ्नी ग्रहणी क्षयनाशिनी ॥ ३.९१ ॥

कटूष्णा दीपनी वृष्या नेत्र्या वातकफापहा ।

रसेन्द्रजारणे प्रोक्ता विडद्रव्येषु शस्यते ॥ ३.९२ ॥

हिङ्गुलशोधनम्

मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ।

सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ ३.९३ ॥

हिङ्गुलगुणाः

तिक्तोष्णं हिङ्गुलं दिव्यं रसगन्धकसम्भवम् ।

मेहकुष्ठहरं रुच्यं बल्यं मेधाग्निदीपनम् ॥ ३.९४ ॥

शिलाजतुशोधनम्

गोदुग्धत्रिफलाभृङ्गद्रवैः पिष्टं शिलाजतु ।

दिनैकं लोहजे पात्रे शुद्धिमायात्यसंशयः ॥ ३.९५ ॥

शिलाजतुगुणाः

शिलाजतु भवेत्तिक्तं कटूष्णं च रसायनम् ।

क्षयशोषोदरार्शांसि हन्ति बस्तिरुजो जयेत् ॥ ३.९६ ॥

उपरसशोधनम्

सौवीरं टंकणं शंखं कङ्कुष्ठं गैरिकं तथा ।

एते वराटवच्छोध्या भवेयुर्दोषवर्जिताः ॥ ३.९७ ॥

रत्नशोधनम्[1]

शुध्यत्यम्लेन माणिक्यं जयन्त्या मौक्तिकं तथा ।

विद्रुमं क्षारवर्गेण ताक्ष्यं गोदुग्धत[2]स्तथा ॥ ३.९८ ॥

पुष्परागं च सन्धानैः कुलत्थक्वाथसंयुतैः ।

तण्डुलीय[3]जलैर्वज्रं नीलं नीलीरसेन च ॥ ३.९९ ॥

रोचनाभिश्च गोमेदं वैडूर्यं[4] त्रिफलाजलैः ।

रत्नमारणम्

लकुचद्रावसम्पिष्टैः शिलागन्धकतालकैः ।

वज्रं विनाऽन्यरत्नानि म्रियन्तेऽष्टपुटैः खलु ॥ ३.१०० ॥

रत्नगुणाः

मुक्ताविद्रुमवज्रेन्द्रवैदूर्यस्फटिकादिकम् ॥ ३.१०१ ॥

---

[1] ख- अथ मणिशोधनम् |

[2] क-गोदुग्धकै....| ग- गोदुग्धकस्तथा |

[3] ख- तन्दुलीय... | तण्डुलीय [(MONIER-WILLIAMS, 1899)pg.४३२], सु.सू.१६.२६;१९.३३;२०.५. [(सुश्रुत, 2010)]

[4] क- वैदूर्यं, ग- वैदूर्य्यं

मणिरत्नं खरं शीतं कषायं स्वादु लेखनम् ।

चक्षुष्यं धारणात्तं तु पापालक्ष्मीविषापहम् ॥ ३.१०२ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यामुपरसशोधनमारणकथनं नाम तृतीयोऽध्यायः ||

****

४.चतुर्थोऽध्यायः

|| विषलक्षणसेवापरिहारकथनम् ||

विषनामानि

अष्टादशविधं ज्ञेयं कन्दजं परिकीर्तितम् ।

कालकूटं मयूराख्यं बिन्दुकं सक्तुकं तथा ॥ ४.१ ॥

वालुकं वत्सनाभं च शङ्खनाभं सुमङ्गलम् ।

शृङ्गीं मर्कटकं मुस्तं कर्दमं पुष्करं शिखी ॥ ४.२ ॥

हारिद्रं हरितं चक्रं विषं हालाहलाह्वयम् ।

विषलक्षणानि

घनं रूक्षं च कठिनं भिन्नाञ्जनसमप्रभम् ॥ ४.३ ॥

कन्दाकारं समाख्यातं कालकूटं महाविषम् ।

मयूराभं महूराख्यं[1] बिन्दुवद्बिन्दुकः स्मृतः ॥ ४.४ ॥

चित्रमुत्पलकन्दाभं शक्तुकं शक्तुवद्भवेत् ।

वालुकं वालुकाकारं वत्सनाभं तु पाण्डुरम् ॥ ४.५ ॥

शङ्खनाभं शङ्खवर्णं शुभ्रवर्णं सुमङ्गलम् ।

घनं गुरुं च निबिडं शृङ्गाकारं तु शृङ्गिकम् ॥ ४.६ ॥

---

[1] क,ग- मयूराख्यं

मर्कटं कपिवर्णाभं मुस्ताकारं तु मुस्तकम् ।

कर्दमं कर्दमाकारं सितं पीतं च कर्दमम् ॥ ४.७ ॥

पुष्करं पुष्कराकारं शिखि शिखिशिखाप्रभम् ।

हारिद्रकं हरिद्राभं हरितं हरितं स्मृतम् ॥ ४.८ ॥

चक्राकारं भवेच्चक्रं नीलवर्णं हलाहलम् ।

ब्राह्मणः पाण्डुरस्तत्र क्षत्रियो रक्तवर्णकः ॥ ४.९ ॥

वैश्यः पीतप्रभः शूद्रः कृष्णाभो निन्दितः स्मृतः ।

ब्राह्मणो दीयते रोगे क्षत्रियो विषभक्षणे ।

वैश्यो व्याधिषु सर्वेषु सर्पदष्टाय शूद्रकम् ॥ ४.१० ॥

विषमारणम्

समटङ्कणकं पिष्टं तद्विषं मृतमुच्यते ।

योजयेत्सर्वरोगेषु न विकारं करोति हि ॥ ४.११ ॥

विषशोधनम्

विषभागांश्च कणवत्स्थूलान् कृत्वा तु भाजने ।

ततः गोमूत्रकं क्षिप्त्वा प्रत्यहं नित्यनूतनम् ॥ ४.१२ ॥

शोषयेत्त्रिदिनादूर्ध्वं कृत्वा तीव्रातपे ततः ।

प्रयोगेषु प्रयुञ्जीत भागमानेन तद्विषम् ॥ ४.१३ ॥

विषसेवनम्

विषस्य मारणं प्रोक्तमथ सेवां प्रवच्म्यहम् ॥ ४.१४ ॥

शरद्ग्रीष्मवसन्तेषु वर्षासु च प्रदापयेत् ।

चातुर्मास्ये हरेद्रोगान् कुष्ठलूतादिकानपि ॥ ४.१५ ॥

प्रथमे सर्षपी मात्रा द्वितीये सर्षपद्वयम् ।

तृतीये च चतुर्थे च पञ्चमे दिवसे तथा ॥ ४.१६ ॥

षष्ठे च सप्तमे चैव क्रमवृद्ध्या विवर्धयेत् ।

सप्तसर्षपमात्रेण प्रथमं सप्तकं भवेत् ॥ ४.१७ ॥

क्रमहानिं तथा क्षेपं[1] द्वितीयं सप्तकं विषम् ।

यवमात्रं विषं देयं तृतीये सप्तके क्रमात् ॥ ४.१८ ॥

वृद्ध्यां हान्यां च दातव्यं चतुर्थे सप्तके[2] तथा ।

यवमात्रं ग्रसेत्स्वस्थो गुञ्जामात्रं तु कुष्ठवान् ॥ ४.१९ ॥

अशीतिर्यस्य वर्षाणि वसुवर्षाणि यस्य वा ।

विषं तस्मै न दातव्यं दत्तं चेद्दोषकारकम् ॥ ४.२० ॥

ददेद्वै सर्वरोगेषु घृताशिनि[3] हिताशिनि ।

---

[1] ग- पक्षे

[2] ख- चतुर्थसप्तके

[3] क- मृताशिनि........अपपाठः |

क्षीराशनं प्रयोक्तव्यं रसायनरते नरे ॥ ४.२१ ॥

ब्रह्मचर्यं प्रधानं[1] हि विषकल्पे तदाचरेत् ।

पथ्ये स्वस्थमना भूत्वा तदा सिद्धिर्न संशयः ॥ ४.२२ ॥

अष्टवेगाः

मात्राधिकं यदा मर्त्यः प्रमादाद्भक्षयेद्विषम् ।

अष्टौ वेगास्तदा तस्य जायन्ते नात्र संशयः ॥ ४.२३ ॥

प्रथमे वेग उद्वेगो द्वितीये वेपथुर्भवेत् ।

तृतीये घोरदाहः स्याच्चतुर्थे पतनं भुवि ॥ ४.२४ ॥

फेनं तु पञ्चमे वेगे षष्ठे विकलता भवेत् ।

जडता सप्तमे वेगे मरणं चाष्टमे भवेत् ॥ ४.२५ ॥

विषवेगपरिहारः

विषवेगांश्च विज्ञाय मन्त्रतन्त्रैर्विनाशयेत् ।

साधकानां हितार्थाय सदाशिवमुखोद्गतः ॥ ४.२६ ॥

सर्वविषविनाशार्थं प्रोच्यते मन्त्र उत्तमः ॥ ४.२७ ॥

ॐ नमो भगवते घोणेयन् हर हर दर दर पर पर तर तर वर वर वध वध वः वः लः लः रं रं[2] लां लां लां हरलां हर हर भव सर रां रां क्षीं क्षीं ह्रीं ह्रीं भगवति श्रीघोणेयन् सं सं सं वर वर रसः ध वर वर खण्ड

---

[1] ख- ब्रह्मचर्यप्रधानं

[2] ख- र र ......अपपाठः |

च रूप ह्रीं वर विहंगम मानुष योगक्षेमं वद शेषारे शेषारे षषः स्वाहा ॥ ४.२८ ॥

विद्यैषा स्मृतिमात्रेण नश्यन्ते गुत्थकादयः ।

सप्तजप्तेन तोयेन प्रोक्षयेत्कालचोदितम् ॥ ४.२९ ॥

उत्तिष्ठति सवेगेन शिखाबन्धेन धारयेत् ।

त्रिमन्त्रितेन शङ्खेन दुन्दुभिर्वादयेद्यदि ॥ ४.३० ॥

देशान्तरे शरीरेऽपि निर्विषं कुरुते क्षणात् ।

विषं दृष्ट्वा यदा मन्त्री मन्त्रमावर्तयेत्सकृत् ।

याति[1] निर्विषतां दृष्ट्वा[2] अपि मारशतानि च ॥ ४.३१ ॥

गोघृतपानाद्धरते विविधं गरलं च वन्ध्यकर्कोटी ।

सकलविषदोषशमनी त्रिशूलिका सुरभिजिह्वा च ॥ ४.३२ ॥

विषमारणम्

तुत्थेन टङ्कणेनैव म्रियते पेषणाद्विषम् ।

अतिमात्रं तदा भुङ्क्ते तदाज्यं टङ्कणं पिबेत् ॥ ४.३३ ॥

न दातव्यं न भोक्तव्यं विषं वादे कदाचन ।

आचार्येण तु भोक्तव्यं शिष्यप्रत्ययकारणम् ॥ ४.३४ ॥

---

[1] ग- दृष्ट्वा

[2] ग- याति

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां विषलक्षणसेवापरिहारकथनं नाम चतुर्थोऽध्यायः ||

****

५.पञ्चमोऽध्यायः

|| स्वर्णाद्यष्टधातुशोधनमारणसेवनकथनम् ||

अष्टधातुशोधनमारणम्

हेमादिलोहकिट्टान्तं शोधनं मारणं गुणम् ।

वक्ष्ये सप्रत्ययं योगं यथागुरुमुखोदितम्[1] ॥ ५.१ ॥

तैले तक्रे[2] गवां मूत्रे क्वाथे कौलत्थकाञ्जिके ।

तप्तं तप्तं निषिञ्चेत्तु[3] तत्तद्द्रावे तु सप्तधा ॥ ५.२ ॥

स्वर्णादिलोहपर्यन्तं शुद्धिर्भवति निश्चितम् ।

शोधनं मारणं चैव कथ्यते च मयाधुना ॥ ५.३ ॥

स्वर्णशोधनम्

मृत्तिकामातुलुङ्गाम्लैः पञ्चवासरभाविता ।

सभस्मलवणं[4] हेम शोधयेत्पुटपाकतः ॥ ५.४ ॥

स्वर्णभस्म (१)

शुद्धसूतसमं हेम खल्वे कुर्याच्च गोलकम् ।

अधोर्ध्वं गन्धकं दत्त्वा सर्वं तुल्यं निरुध्य च ॥ ५.५ ॥

---

[1] ख- ....मुखोत्थितम्

[2] ख- तक्र......अपपाठः |

[3] क- निषेचेत्तु .....अपपाठः |

[4] ख- सभस्मलवणा

त्रिंशद्वनोपलैर्देयं पुटान्येवं चतुर्दश ।

निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥ ५.६ ॥

स्वर्णभस्म (२)

कृत्वा कण्टकवेध्यानि स्वर्णपत्राणि लेपयेत् ।

लुङ्गाम्बुभस्मसूतेन म्रियते दशभिः पुटैः ॥ ५.७ ॥

स्वर्णभस्म (३)

रसस्य भस्मना वाथ रसैर्वा लेपयेद्दलम् ।

हिङ्गुहिङ्गुलसिन्दूरैः शिलासाम्येन लेपयेत् ॥ ५.८ ॥

संमर्द्य काञ्चनद्रावैर्दिनं कृत्वाथ गोलकम् ।

तं भाण्डस्य तले धृत्वा भस्मना पूरयेद्दृढम् ॥ ५.९ ॥

अग्निं प्रज्वालयेद्गाढं द्विनिशं स्वाङ्गशीतलम् ।

उद्धृत्य सावशेषं च पुनर्देयं पुटत्रयम् ॥ ५.१० ॥

अनेन विधिना स्वर्णं निरुत्थं जायतेऽमितम्[1] ।

एतद्रसायनं बल्यं वृष्यं शीतं क्षयादिहृत् ॥ ५.११ ॥

स्वर्णभस्म (४)

गलितस्य सुवर्णस्य षोडशांशेन सीसकम् ।

योजयित्वा समुद्धृत्य निम्बुनीरेण मर्दयेत् ॥ ५.१२ ॥

---

[1] ख- जायते मतिम्

तद्गोलकसमं गन्धं चूर्णं दद्यादधोपरि ।

शरावसम्पुटे धृत्वा पुटेद्विंशद्वनोपलैः ॥ ५.१३ ॥

एवं मुनिपुटैर्हेम नोत्थानं लभते पुनः ।

स्वर्णभस्म (५)

माक्षिकं नागचूर्णं च पिष्टमर्करसे पुनः ॥ ५.१४ ॥

हेमपत्रं च तेनैव म्रियते क्षणमात्रतः ।

स्वर्णगुणाः

कषायतिक्तमधुरं सुवर्णं गुरु लेखनम् ॥ ५.१५ ॥

वृष्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ।

आयुर्मेदोवयःस्थैर्य[1]वाग्विशुद्धिस्मृतिप्रदम् ॥ ५.१६ ॥

क्षयोन्मादगदार्तानां शमनं परमुच्यते ।

रजतशोधनम्[2]

भागेन क्षारराजेन द्रावितं शुद्धिमिच्छता ॥ ५.१७ ॥

रजतमारणम्[3] (१)

तारपत्रं चतुर्भागं भागैकं शुद्धतालकम् ।

मर्द्यं जम्बीरजैर्द्रावैस्तारपत्राणि लेपयेत् ॥ ५.१८ ॥

---

[1] ख- स्थैर्यं

[2] ख- अथ तारशोधनम् ।

[3] क- रजतभस्म, ख- अथ तारमारणम् ।

रुद्ध्वा त्रिभिः पुटैः पाच्यं पञ्चविंशद्वनोपलैः ।

म्रियते नात्र सन्देहो गन्धो देयः पुनः पुनः ॥ ५.१९ ॥

रजतमारणम्[1] (२)

स्वर्णमाक्षिकगन्धस्य समं भागं तु कारयेत् ।

अर्कक्षीरेण सम्पिष्टं तारपत्रं प्रलिप्य च ॥ ५.२० ॥

पुटेन जारयेत्तारं[2] मृतं भवति निश्चितम् ।

रजतमारणम् (३)

विधाय पिष्टिं सूतेन रजतस्याथ मेलयेत् ॥ ५.२१ ॥

तालं गन्धं समं पश्चान्मर्दयेन्निम्बुकद्रवैः ।

द्वित्रैः पुटैः भवेद्भस्म योज्यमेव रसादिषु ॥ ५.२२ ॥

रजतभस्मगुणाः[3]

शीतं कषायं मधुरमम्लं वातप्रकोपजित् ।

दीपनं बलकृत्स्निग्धं गूढा[4]जीर्णविनाशनम् ।

आयुष्यं दीर्घरोगघ्नं रजतं लेखनं परम् ॥ ५.२३ ॥

---

[1] ख- अन्यच्च |, क- रजतभस्म |

[2] ख- जारयेतारं........अपपाठः |

[3] क- रजतगुणाः |, ख- तारभस्मगुणाः |

[4] क- गाढा...|

ताम्रशोधनावश्यकता

न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते ।

ताम्रदोषाः[1]

एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः ॥ ५.२४ ॥

भ्रमो मूर्च्छा विदाहश्च स्वेदक्लेदनवान्तयः ।

अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः ॥ ५.२५ ॥

तस्माद्विशुद्धं संग्राह्यं ताम्रं रोगप्रशान्तये ।

ताम्रशोधनम् (१)

लवणैर्वज्रदुग्धेन ताम्रपत्रं विलेपयेत् ॥ ५.२६ ॥

अग्नौ संताप्य निर्गुण्डीरसैः सिक्तं च सप्तधा ।

स्नुह्यर्कस्वरसेऽप्येवं शुल्बशुद्धिर्भविष्यति ॥ ५.२७ ॥

ताम्रशोधनम्[2] (२)

गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ।

शुध्यते नात्र सन्देहो मारणं वाप्यथोच्यते ॥ ५.२८ ॥

ताम्रभस्म[3] (१)

सूतमेकं द्विधा गन्धं यामं कन्यां विमर्दयेत् ।

---

[1] ख- अथ अष्टदोषाः ।

[2] ख- अन्यच्च ।

[3] ख- अथ ताम्रमारणम् ।

द्वयोस्तुल्यं ताम्रपत्रं स्थाल्या गर्भे[1] निरोधयेत् ॥ ५.२९ ॥

सम्यङ्मृल्लवणैः सार्द्धं पार्श्वे भस्म निधाय च ।

चतुर्यामं पचेच्चुल्ल्यां पात्रपृष्ठे[2] सगोमये ॥ ५.३० ॥

जलं पुनः पुनर्देयं स्वाङ्गशीतं विचूर्णयेत् ।

म्रियते नात्र सन्देहः सर्वयोगेषु योजयेत् ॥ ५.३१ ॥

ताम्रभस्म[3] (२)

चतुर्थांशेन सूतेन ताम्रपत्राणि लेपयेत् ।

अम्लपिष्टं द्विगुणित[4]मधोर्ध्वं दापयेद्बलिम् ॥ ५.३२ ॥

चाङ्गेरीकल्कगर्भे तद्भाण्डे यामं पचेद्दृढम् ।

भस्मीभूतं ताम्रपत्रं सर्वयोगेषु योजयेत् ॥ ५.३३ ॥

ताम्रभस्म[5] (३)

जम्बीररससम्पिष्टं रसगन्धकलेपितम् ।

शुल्बपत्रं शरावस्थं त्रिपुटैर्याति पञ्चताम् ॥ ५.३४ ॥

---

[1] ख- स्थाल्यागर्भे

[2] ख- पत्रपृष्ठे

[3] ख- अथान्यः प्रकारः ।

[4] ख- द्विगुर्णतम.....।

[5] ख- अन्यच्च ।

ताम्रभस्मगुणाः

ताम्रं तिक्ताम्लमधुरं कषायं शीतलं परम् ॥ ५.३५ ॥

कफपित्तक्षयं धातुकुष्ठघ्नं च रसायनम् ।

नाशयेच्छूलमर्शांसि वृक्षमिन्द्राशनिर्यथा ॥ ५.३६ ॥

राजरीतिघोषशोधनमारणम्[1]

राजरीति[2]स्तथा घोषं[3] ताम्रवन्मारयेत्पृथक् ।

ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम् ॥ ५.३७ ॥

नागवङ्गशोधनम्[4]

नाग[5]वङ्गौ[6] च गलितौ रविदुग्धेन सेचयेत् ।

त्रिवारं शुद्धिमायाति सच्छिद्रे हण्डिकान्तरे ॥ ५.३८ ॥

---

[1] ख- अथ कांस्यपित्तलमारणम् |

[2] राजरीतिः ,स्त्री, पित्तलविशेषः । तत्पर्य्यायः । पाकतुण्डी २ राजपुत्त्री ३ महेश्वरी ४ ब्रह्माणी ५ ब्रह्मारीतिः ६ कपिला ७ पिङ्गला ८ ।शब्द.कल्प. (Vasu & Vasu, 1808-1814 Saka era, (1866-)),pg.4-125]

[3] ताम्ररङ्गमिश्रितधातुः । काँसा इति भाषा । तत्पर्य्यायः । कंसम् २ कंसास्थि ३ ताम्रार्द्धम् ४ । इति त्रिकाण्डशेषः ॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वह्निलोहकम् ८ दीप्तिलोहम् ९ घोरघुष्यम् १० दीप्तिकांस्यम् ११ कास्यम् १२ | शब्द.कल्प.2.071[(Vasu & Vasu, 1808-1814 Saka era, (1866-))]

[4] ख- नास्ति |

[5] नागः सर्वरोगापहा नृणाम् || सीसं ब्रध्नं च वप्रं च योगेष्टं नागनामकम् |भा. प्र. पू. मिश्र. ८ .३२-३४ (श्रीभावमिश्रविरचित, 2012)

[6] रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि |क्षुरकं मिश्रकं चापि द्विविधं वङ्गमुच्यते |भा. प्र. पू. मिश्र. ८ / वङ्ग (२८)

नागमारणम् (१)

त्रिभिः कुम्भपुटैर्नागो वासास्वरसमर्दितः ।

सा शिला भस्मतामेति तद्रजः सर्वमेहहृत् ॥ ५.३९ ॥

नागमारणम् (२)

भूभुजङ्गमगस्तिं च पिष्ट्वा पात्रं विलेपयेत् ।

तद्रसं विद्रुते नागे वासापामार्गसम्भवम् ॥ ५.४० ॥

क्षारं विमिश्रयेत्तत्र चतुर्थांशं गुरूक्तितः ।

प्रहरं पाचयेच्चुल्ल्यां वासादर्व्या च घट्टिता ॥ ५.४१ ॥

तत उद्धृत्य तच्चूर्णं वासानीरे विमर्दयेत् ।

पुटेत्पुनः समुद्धृत्य तेनैव परिमर्दयेत् ॥ ५.४२ ॥

एवं सप्तपुटं नागं सिन्दूरं जायते ध्रुवम् ।

नागभस्मगुणाः

तारस्थो रञ्जनो नागो वातपित्तकफापहः ॥ ५.४३ ॥

ग्रहणीकुष्ठमेहार्शःप्राणशोषविषापहः ।

वङ्गमारणम् (१)

आभीरं शोधयेदादौ द्रावयेद्धण्डिकान्तरे ॥ ५.४४ ॥

अपामार्गचतुर्थांशं चूर्णितं मेलयेत्ततः ।

स्थूलाग्रया लोहदर्व्या शनैस्तदवचालयेत् ॥ ५.४५ ॥

यावद्भस्मत्वमायाति तावन्मर्द्यं च पूर्ववत् ।

तत एकीकृतं सर्वं भवेदङ्गारवर्णकम् ॥ ५.४६ ॥

नूतनेन शरावेण रोधयेदन्तरे भिषक् ।

पश्चात्तीव्राग्निना पक्वं वङ्गभस्म भवेद्ध्रुवम् ॥ ५.४७ ॥

वङ्गमारणम्[1] (२)

वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन तं पुटेत् ।

शुष्काश्वत्थभवैर्वल्कैः सप्तधा भस्मतां व्रजेत् ॥ ५.४८ ॥

वङ्गभस्मगुणाः

वङ्गं तिक्तोष्णकं रूक्षमीषद्वातप्रकोपनम् ।

मेहश्लेष्मामयघ्नं च कृमिघ्नं मोहनाशनम् ॥ ५.४९ ॥

लोहशोधनम्

त्रिफलाष्टगुणे[2] तोये त्रिफला षोडशं पलम् ।

तत्क्वाथे पादशेषे तु लोहस्य पलपञ्चकम् ॥ ५.५० ॥

कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत् ।

एवं प्रलीयते दोषो गिरिजो लोहसम्भवः ॥ ५.५१ ॥

---

[1] क- वङ्गभस्म |, ख- अन्यच्च |

[2] क- त्रिफलादष्टगुणे ....अपपाठः |

लोहभस्म[1] (१)

शुद्धस्य सूतराजस्य भागो भागद्वयं बलेः ।

द्वयोः समं सारचूर्णं मर्दयेत्कन्यकाम्बुना ॥ ५.५२ ॥

यामद्वयं ततो गोलं स्थापयेत्ताम्रभाजने ।

आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयं भवेत् ॥ ५.५३ ॥

त्रिदिनं धान्यराशिस्थं तं ततो मर्दयेद्दृढम् ।

रजस्तद्वस्त्रगलितं नीरे तरति हंसवत् ॥ ५.५४ ॥

तीक्ष्णं मुण्डं कान्तलोहं निरुत्थं जायते मृतम् ।

त्रिफलामधुसंयुक्तमेतत्सेव्यं रसायनम् ॥ ५.५५ ॥

लोहभस्म (२)

द्वादशांशेन दरदं तीक्ष्णचूर्णस्य मेलयेत् ।

कन्यानीरेण संमर्द्य यामयुग्मं तु तत्पुटेत् ।

पुटेदेवं लोहचूर्णं सप्तधा मरणं व्रजेत् ॥ ५.५६ ॥

लोहभस्म (३)

काकोदुम्बरिकानीरे लोहपत्राणि सेचयेत् ।

तप्ततप्तानि षड्वारं कुट्टयेत्तदुलूखले[2] ॥ ५.५७ ॥

---

[1] ख- अथ लोहमारणम् |

[2] क- ...तदुदूखले

तत्पञ्चमांशं दरदं क्षिप्त्वा सर्वं विमर्दयेत् ।

कुमारीनीरतस्तीक्ष्णं पुटे गजपुटे तथा ॥ ५.५८ ॥

त्रिवारं त्रिफलाक्वाथैस्तत्संख्याकैरतन्द्रितः ।

एवं चतुर्दशपुटैर्लोहं वारितरं भवेत् ॥ ५.५९ ॥

लोहभस्म (४)

तिन्दूफलस्य मज्जायां खड्गं लिप्त्वाऽऽतपे खरे ।

धारयेत्कांस्यपात्रेण दिनैकेन पुटत्यलम् ॥ ५.६० ॥

लेपं पुनः पुनः कुर्याद्दिनान्ते तत्प्रपेषयेत् ।

त्रिफलाक्वाथसंयुक्तं दिनैकेन मृतिर्भवेत् ॥ ५.६१ ॥

लोहभस्म (५)

लोहं पत्रमतीव तप्तमसकृत्क्वाथे क्षिपेत्त्रैफले

चूर्णीभूतमतो भवेत्त्रिफलजे क्वाथे पचेत्गोजले ।

मत्स्याक्षीत्रिफलारसेन पुटयेद्यावन्निरुत्थं भवेत्

पश्चादाज्यमधुप्लुतं सुपुटितं भस्म भवेदायसम् ॥ ५.६२ ॥

लोहभस्मपरीक्षा

सर्वमेतन्मृतं लोहं ध्मातव्यं मृत्पञ्चके[1] ।

यद्येव स्यान्निरुत्थानं सत्यं वारितरं भवेत् ॥ ५.६३ ॥

---

[1] क- मृतपञ्चके

लोहनिरुत्थभस्म

गन्धकं तुत्थकं लोहं तुल्यं खल्वे विमर्दयेत् ।

दिनैकं कन्यकाद्रावै रुद्ध्वा गजपुटे पचेत् ।

इत्येवं सर्वलोहानां कर्तव्येत्थं निरुत्थितिः ॥ ५.६४ ॥

लोहभस्मगुणाः

कृष्णायसोऽथ शूलार्शःकुष्ठपाण्डुत्वमेहनुत् ।

वयःस्थं गुरु चक्षुष्यं सरं मेदोगदापहम् ॥ ५.६५ ॥

आयुःप्रदाता बलवीर्यकर्ता रोगस्य हर्ता मदनस्य कर्ता ।

अयःसमानं नहि किंचिदन्यद्रसायनं श्रेष्ठतमं हि जन्तोः[1] ॥ ५.६६ ॥

लोहस्य पथ्यापथ्यविधिः

कूष्माण्डं तिलतैलं च माषान्नं राजकं तथा ।

मद्यमम्लरसं चैव त्यजेल्लोहस्य सेवकः ॥ ५.६७ ॥

किट्टग्रहणम्

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।

तस्मात्सर्वत्र मण्डूरं रोगशान्त्यै नियोजयेत् ॥ ५.६८ ॥

शतोत्थमुत्तमं किट्टं[2] मध्यमाशीतिवार्षिकम् ।

---

[1] क- जन्तो

[2] n. secretion, excretion [(MONIER-WILLIAMS, 1899),pg.282], सु.शा.४.२५;

अधमं षाष्टिवार्षीयं[1] ततो हीनं विषोपमम् ॥ ५.६९ ॥

दग्धाक्षकाष्ठैर्मलमायसं तु

गोमूत्रनिर्वापितमष्टवारान् ।

विचूर्ण्य लीढं मधुनाचिरेण

नृणां क्षयं पाण्डुगदं निहन्ति ॥ ५.७० ॥

किट्टाद्दशगुणं मुण्डं

मुण्डात्तीक्ष्णं शताधिकम् ।

तीक्ष्णाल्लक्षगुणं कान्तं

भक्षणात्कुरुते गुणम् ॥ ५.७१ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां स्वर्णाद्यष्टधातुशोधनमारणसेवनकथनं[2] नाम पञ्चमोऽध्यायः ||

****

सु.उ.४४.३२;३४ (सुश्रुत, 2010), १ धातूनां मले, २ तैलाद्यधोभागस्थे मले च |[वाच. (Bhat̲t̲ācārya, (1962).)pg.२०४६]

[1] क- षष्टिवर्षीयं

[2] ख- ...मारणसेवनं |

६.षष्ठोऽध्यायः

|| रसयोगनिरूपणम् ||

धन्वन्तरिवन्दना

क्षीराब्धेरुत्थितं देवं पीतवस्त्रं चतुर्भुजम् ।

वन्दे धन्वन्तरिं नित्यं नानागदनिषूदनम् ॥ ६.१ ॥

यथा गुरुमुखं श्रुत्वा सानुभूतं च तद्रसम् ।

स रसः प्रोच्यते ह्यत्र व्याधिनाशनहेतवे ॥ ६.२ ॥

रसवैद्यमहत्त्वम्

मुक्त्वैकं रसवैद्यं च लाभपूजायशस्विनम् ।

तृणकाष्ठौषधैर्वैद्यः को लभेत वराटिकाम् ॥ ६.३ ॥

पारदमहत्त्वम्

यस्य रोगस्य यो योगो मुनिभिः परिकीर्तितः ।

तत्तद्योगसमायुक्तं भिषक्सूतं प्रयोजयेत् ॥ ६.४ ॥

मात्राधिकं न सेवेत रसं वा विषमौषधम् ।

व्याधिबद्धं[1] च कोष्ठं च वीक्ष्य मात्रां प्रयोजयेत् ॥ ६.५ ॥

रत्नगर्भपोटलीरसः

रसं वज्रं हेम तारं नागं लोहं च ताम्रकम् ।

---

[1] क,ग- त्र्याधिबद्धं

तुल्यांशमारिते योज्यं मुक्तामाक्षिकविद्रुमम् ॥ ६.६ ॥

शङ्खं च तुल्यतुल्यांशं सप्ताहं चित्रकद्रवैः ।

मर्दयित्वा विचूर्ण्याथ तेनापूर्य वराटिकाम् ॥ ६.७ ॥

टङ्कणं रविदुग्धेन पिष्ट्वा मूषां च बन्धयेत् ।

मृद्भाण्डे च निरुध्याथ सम्यग्गजपुटे पचेत् ॥ ६.८ ॥

स्वाङ्गशीतं समुद्धृत्य सूक्ष्मचूर्णानि कारयेत् ।

आदाय चूर्णयेत्सर्वं निर्गुण्ड्याः सप्तभावनाः ॥ ६.९ ॥

आर्द्रकस्य रसैः सप्त चित्रकस्यैकविंशतिः ।

द्रवैर्भाव्यं ततः शोष्यं देयं गुञ्जाचतुष्टयम् ॥ ६.१० ॥

क्षयरोगं निहन्त्याशु साध्यासाध्यं न संशयः ।

योजयेत्पिप्पलीक्षौद्रैः सघृतैर्मरिचेन च ॥ ६.११ ॥

महारोगाष्टके कासे ज्वरे श्वासेऽतिसारके ।

पोटलीरत्नगर्भोऽयं योगवाहेषु योजयेत् ॥ ६.१२ ॥

मृगाङ्करसः

स्याद्रसेन समं हेम मौक्तिकं द्विगुणं भवेत् ।

गन्धकं च समं तेन रसपादस्तु टङ्कणम् ॥ ६.१३ ॥

सर्वं तद्गोलकं कृत्वा काञ्जिकेनावशोषयेत् ।

भाण्डे लवणपूर्णे च पचेद्यामचतुष्टयम् ॥ ६.१४ ॥

मृगाङ्कसंज्ञको ज्ञेयो राजयोगनिकृन्तनः ।

गुञ्जाचतुष्टयं चास्य मरिचैर्भक्षयेद्भिषक् ॥ ६.१५ ॥

पिप्पलीदशकैर्वापि मधुना लेहयेद्बुधः ।

पथ्यं सुलघुमांसेन प्रायेणास्य प्रयोजयेत् ॥ ६.१६ ॥

दध्याज्यगव्यं तक्रं वा क्षीरं वाजं प्रयोजयेत् ।

व्यञ्जनैर्मृतपक्वैश्च नातिक्षारैरहिङ्गुकैः ॥ ६.१७ ॥

एलाजम्बीरमरिचैः संस्कृतैरविदाहिभिः ।

वृन्ताकतैलबिल्वानि कारवेल्लं च वर्जयेत् ॥ ६.१८ ॥

स्त्रियं परिहरेद्दूरात्कोपं चापि परित्यजेत् ।

वल्ली तुम्बरिकानाम तन्मूलं क्वाथयेत्पलम् ॥ ६.१९ ॥

कटुकत्रयसंयुक्तं पाययेत्कासशान्तये ।

त्रिशूली या समाख्याता तन्मूलं क्वाथयेद्बलम् ॥ ६.२० ॥

ईषद्धिङ्गुसमायुक्तं काकिणी चित्रकं वचा ।

भक्षयेत्पथ्यभोज्यं च सर्वरोगप्रशान्तये ॥ ६.२१ ॥

मर्कटीपत्रचूर्णस्य गुटिकां मधुना कृताम् ।

धारयेत्सततं वक्त्रे कासविष्टम्भनाशिनीम् ॥ ६.२२ ॥

छागमांसं पयश्छागं छागं सर्पिः सनागरम् ।

छागोपसेवासहनं छागमध्ये तु यक्ष्मनुत् ॥ ६.२३ ॥

मलायत्तं बलं पुंसां शुक्रायत्तं च जीवितम् ।

अतो विशेषतो रक्षेद्यक्ष्मिणो मलरेतसी ॥ ६.२४ ॥

लोकनाथरसः[1]

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः ।

माषोऽपि टंकणस्यैको जम्बीरेण विमर्दयेत् ॥ ६.२५ ॥

पुटेल्लोकेश्वरो नाम लोकनाथोऽयमुत्तमः ।

जयेत्कुष्ठं रक्तपित्तमन्यरोगं क्षयं नयेत् ॥ ६.२६ ॥

पुष्टवीर्यप्रदाता च कान्तिलावण्यदः परः ।

कोऽस्ति लोकेश्वरादन्यो नृणां शम्भुमुखोद्गतात् ॥ ६.२७ ॥

लोकेश्वरपोटलीरसः

रसस्य भस्मना हेम पादांशेन प्रकल्पयेत् ।

द्विगुणं गन्धकं दत्त्वा मर्दयेच्चित्रकाम्बुना ॥ ६.२८ ॥

वराटकांश्च सम्पूर्य टङ्कणेन निरुध्य च ।

भाण्डे चूर्णं प्रतिलिखेत्क्षिप्त्वा रुन्धीत मृन्मये ॥ ६.२९ ॥

शोषयित्वा पुटेद्गर्भे वह्निं दत्त्वा पराह्णिके ।

---

[1] ख- अथ लोकनाथपोटलीरसः ।

स्वाङ्गशीतं समुद्धृत्य चूर्णयित्वाथ विन्यसेत् ॥ ६.३० ॥

एष लोकेश्वरो नाम वीर्यपुष्टिविवर्द्धनः ।

लोकेश्वरपोटलीरससेवनम्

गुञ्जाचतुष्टयं चास्य पिप्पलीमधुसंयुतम् ॥ ६.३१ ॥

खादयेत्परया भक्त्या लोकेशः सर्वसिद्धिदः ।

अङ्गकार्श्येऽग्निमान्द्ये च कासपित्ते रसस्त्वयम् ॥ ६.३२ ॥

मरिचैर्घृतसंयुक्तैः प्रदातव्यो दिनत्रयम् ।

लवणं वर्जयेत्तत्र शयीतोत्तानपादतः ॥ ६.३३ ॥

एकविंशद्दिनं यावन्मरिचं सघृतं पिबेत् ।

पथ्यं मृगाङ्कवद्देयं शयीतोत्तानपादतः ॥ ६.३४ ॥

फलानि

ये शुष्का विषमानिलैः क्षयरुजाव्याप्ताश्च ये कुष्ठिनो

ये पाण्डुत्वहताः कुवैद्यविधिना ये शोषिणो दुर्भगाः ।

ये तप्ता विविधैर्ज्वरैर्भ्रममदोन्मादैः प्रमादं गतास्ते

सर्वे विगतामया हतरुजः स्युः पोटलीसेवया ॥ ६.३५ ॥

राजमृगाङ्करसः

रसभस्म त्रयो भागा भागैकं हेमभस्मकम् ।

मृतताम्रस्य भागैकं शिलागन्धकतालकम् ॥ ६.३६ ॥

प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत् ।

वराटीः पूरयेत्तेन ह्यजाक्षीरेण टङ्कणम् ॥ ६.३७ ॥

पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे च निरोधयेत् ।

शुष्कं गजपुटे पाच्यं चूर्णयेत्स्वाङ्गशीतलम् ॥ ६.३८ ॥

रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः कफापहः ।

दशभिः पिप्पलीक्षौद्रैर्मरिचैकोनविंशतिः ।

सघृतैर्दापयेत्क्वाथं वातश्लेष्मोद्भवे क्षये ॥ ६.३९ ॥

रत्नगिरिरसः

शुद्धं सूतं समं गन्धं मृतं स्वर्णाभ्रताम्रकम् ।

प्रत्येकं सूततुल्यं स्यात्सूतार्द्धं मृतलोहकम् ॥ ६.४० ॥

लोहार्द्धं मृतवैक्रान्तं मर्दयेद्भृङ्गजैर्द्रवैः ।

पर्पटीरसवत्पाच्यं चूर्णितं भावयेत्पृथक् ॥ ६.४१ ॥

शिग्रुवासकनिर्गुण्डीवचासोमाग्निभृङ्गजैः ।

क्षुद्रामृताजयन्तीभि[1]र्मुनिब्राह्मीसुतिक्तकैः[2] ॥ ६.४२ ॥

---

[1] ख- क्षुद्रा मुण्डीजयन्त्योश्च | मुण्डी, f.Sphaerantus Hirtus,[MW.pg.] भा.प्र.पू.मिश्र. ४.१८३-१८६, ११.७;१०;४४| अमृता- गुडूची मधुपर्णी स्यादमृतामृतवल्लरी || भा.प्र.पू.मिश्र.४.६||

[2] ख- मुनिब्रह्मोत्थचित्रकैः | चित्रक- भा.प्र.पू.मिश्र.२.६४| सुतिक्त,रा.नि.८.८३||

कन्याद्रावैश्च संभाव्य प्रतिद्रावैस्त्रिधा त्रिधा ।

रुद्ध्वा लघुपुटे पाच्यं भूधरे तं समुद्धरेत् ॥ ६.४३ ॥

सेवनविधिः

इमं नवज्वरे दद्यान्माषमात्रं रसस्य तु ॥ ६.४४ ॥

कृष्ण[1]धान्यकसम्मिश्रं मुहूर्ताद्विज्वरो भवेत् ।

अयं रत्नगिरिर्नाम रसो योगस्य वाहकः ॥ ६.४५ ॥

हिङ्गुलेश्वररसः

तुल्यांशं चूर्णयेत्खल्वे पिप्पलीं हिङ्गुलं विषम् ।

द्विगुञ्जं मधुना देयं वातज्वरनिवृत्तये ॥ ६.४६ ॥

शीतभञ्जीरसः (१)

पारदं रसकं तालं तुत्थं टङ्कणगन्धकम् ।

सर्वमेतत्समं शुद्धं कारवेल्ल्या द्रवैर्दिनम् ॥ ६.४७ ॥

मर्दयेत्तेन कल्केन ताम्रपात्रोदरं लिपेत्[2] ।

अङ्गुल्यर्धप्रमाणेन पचेत्तत्सिकताह्वये ॥ ६.४८ ॥

यन्त्रे यावत्स्फुटन्त्येवं व्रीहयस्तस्य पृष्ठतः ।

ततः सुशीतलं ग्राह्यं ताम्रपात्रोदराद्भिषक् ॥ ६.४९ ॥

---

[1] क,ग- कृष्णा....

[2] अपपाठः ....लिम्पेत् इत्यपेक्ष्यते |

शीतभञ्जीरसो नाम चूर्णयेन्मरिचैः समम् ।

माषैकं पर्णखण्डेन भक्षयेन्नाशयेज्ज्वरम् ।

त्रिदिनैर्विषमं तीव्रमेकद्वित्रिचतुर्थकम् ॥ ६.७० ॥

शीतभञ्जीरसः (२)

रसहिङ्गुलगन्धं च जैपालं च त्रिभिः समम् ।

दन्तीक्वाथेन संमर्द्य रसो ज्वरहरः स्मृतः ॥ ६.७१ ॥

आर्द्रकस्य रसेनाथ दापयेद्रक्तिकाद्वयम् ।

नवज्वरं महाघोरं नाशयेद्याममात्रतः ॥ ६.७२ ॥

शर्करा दधिभक्तं च पथ्यं देयं प्रयत्नतः ।

शीततोयं पिबेच्चानु इक्षुमुद्गरसो हितः ।

शीतभञ्जीरसो नाम सर्वज्वरविनाशकः ॥ ६.७३ ॥[1]

शीतारिरसः

सूतकं टङ्कणं गन्धं शुल्बचूर्णं समं समम् ।

सूताद्द्विगुणितं देयं जैपालं तुषवर्जितम् ॥ ६.७४ ॥

सैन्धवं मरिचं चिञ्चात्वग्भस्मापि च शर्कराः ।

प्रत्येकं सूततुल्यं स्याज्जम्बीरैर्मर्दयेद्दिनम् ॥ ६.७५ ॥

---

[1] ख- ६.६०-६३a

द्विगुञ्जं तप्ततोयेन वातश्लेष्मज्वरापहम् ।

रसः शीतारिनामायं शीतज्वरहरः परः ॥ ६.५६ ॥[1]

ज्वरराजरसः

भागैकं रसराजस्य भागस्यार्धेन माक्षिका ॥ ६.५७ ॥

भागद्वयं शिलायाश्च गन्धकस्य त्रयो मताः ।

तालकाष्टादश भागाः शुल्बस्य भागपञ्चकम् ॥ ६.५८ ॥

भल्लातकत्रयो भागाः सर्वमेकत्र चूर्णयेत् ।

वज्रीक्षीरप्लुतं कृत्वा दृढे मृन्मयभाजने ॥ ६.५९ ॥

विधाय सुदृढं मुद्रां पचेद्यामचतुष्टयम् ।

स्वाङ्गशीतं समुद्धृत्य मर्दयेत्सुदृढं पुनः ॥ ६.६० ॥

गुञ्जाचतुष्टयं चास्य पर्णखण्डेन दापयेत् ।

ज्वरराजः प्रसिद्धोऽयमष्टज्वरविनाशकः ॥ ६.६१ ॥

प्रातःकाले प्रभुज्यैनं पथ्यं तक्रौदनं हितम् ।

भागेन तुत्थसंयुक्तं चातुर्थिकनिवारणम् ॥ ६.६२ ॥

महाज्वराङ्कुशरसः

सूतं गन्धं विषं तुल्यं धूर्तबीजं त्रिभिः समम् ।

---

[1] ख- ६.५१-५४a

तच्चूर्णाद्द्विगुणं व्योषचूर्णं गुञ्जाद्वयं हितम् ॥ ६.६३ ॥

जम्बीरकस्य मज्जाभिरार्द्रकस्य रसैर्युतः ।

महाज्वराङ्कुशो नाम ज्वराष्टकनिकृन्तनः ॥ ६.६४ ॥

ऐकाहिकं[1] द्वाहिकं च त्र्याहिकं च चतुर्थकम् ।

विषमं च त्रिदोषोत्थं हन्ति सर्वं न संशयः ॥ ६.६५ ॥

व्यायामं च व्यवायं च स्नानं चङ्क्रमणं तथा ।

ज्वरमुक्तो न सेवेत यावन्नो बलवान्भवेत् ॥ ६.६६ ॥

प्राणेश्वररसः

शुद्धसूतं तथा गन्धं मृताभ्रं विषसंयुतम् ॥ ६.६७ ॥

समं तन्मर्दयेत्तालमूलीनीरैस्त्र्यहं बुधः ।

पूरयेत्कुपिकां[2] तेन मुद्रयित्वा विशोषयेत् ॥ ६.६८ ॥

सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वाथ शोषयेत् ।

पुटेत्कुम्भप्रमाणेन स्वाङ्गशीतं समुद्धरेत् ॥ ६.६९ ॥

गृहीत्वा कुपिका[3]मध्यान्मर्दयेच्च दिनं ततः ।

अजाजीचित्रकं हिङ्गु स्वर्जिका टङ्कणं च यत् ॥ ६.७० ॥

---

[1] ख- एकाहिकं ....अपपाठः ।

[2] अपपाठः ....कूपिकां इत्यपेक्ष्यते ।

[3] अपपाठः ....कूपिकां इत्यपेक्ष्यते ।

गुग्गुलुः पञ्चलवणं यवक्षारो यवानिका ।

मरिचं पिप्पली चैव प्रत्येकं च समानतः ॥ ६.७१ ॥

एषां कषायेण पुनर्भावयेत्सप्तधातपे ।

नागवल्लीदलयुतः पञ्चगुञ्जो रसेश्वरः ॥ ६.७२ ॥

सेवनविधिः

दद्यान्नवज्वरे तीव्रे सोष्णं वारि पिबेदनु ।

प्राणेश्वरो रसो नाम सन्निपातप्रकोपनुत् ॥ ६.७३ ॥

शीतज्वरे दाहपूर्वे गुल्मे शूले त्रिदोषजे ।

वाञ्छितं भोजनं दद्यात्कुर्याच्चन्दनलेपनम् ॥ ६.७४ ॥

तापोद्रेकस्य शमनं बालाभाषणगायनैः ।

प्रभवेन्नात्र सन्देहः स्वास्थ्यं च लभते नरः ॥ ६.७५ ॥

नवज्वरेभसिंहरसः

शुद्धं सूतं तथा गन्धं लोहं ताम्रं च सीसकम् ।

मरिचं पिप्पलीं विश्वं समभागानि चूर्णयेत् ॥ ६.७६ ॥

अर्द्धभागं विषं दत्वा मर्दयेद्वासरद्वयम् ।

शृङ्गवेरानुपानेन दद्याद्गुञ्जाद्वयं भिषक् ॥ ६.७७ ॥

नवज्वरे महाघोरे वाते सङ्ग्रहणीगदे ।

नवज्वरेभसिंहोऽयं सर्वरोगेषु योजयेत् ॥ ६.७८ ॥

पञ्चाननज्वराङ्कुशरसः

शम्भोः कण्ठविभूषणं समरिचं मारारिरक्तं रविः

पक्षौ सागरलोचनं शशियुतं भागोऽर्कसंख्यान्वितम् ।

खल्वे तं खलु मर्दितं रविजलैर्गुञ्जैकमात्रं ततः

सिद्धोऽयं ज्वरदन्तदर्पदलनः पञ्चाननाख्यो रसः ॥ ६.७९ ॥

पथ्यं च देयं दधितक्रभक्तं

सिन्धूत्थयुक्तं सितया समेतम् ।

गन्धानुलेपो हिमतोयपानं

दुग्धं च देयं शुभदाडिमं च ॥ ६.८० ॥

पञ्चाननरसः

सूतं गन्धकचित्रकं त्रिकटुकं मुस्ता विषं त्रैफल-

मेतेभ्यो द्विगुणां गुडेन गुटिकां गुंजाप्रमाणां हरेत् ।

कुष्ठाष्टादश वायुशूलमुदरं शोषप्रमेहादिकं

रोगानीककरीन्द्रदर्पदलने ख्यातो हि पञ्चाननः ॥ ६.८१ ॥

मृतसंजीवनीरसः

म्लेच्छस्य भागाश्चत्वारो जैपालस्य त्रयो मताः ।

द्वौ भागौ टङ्कणस्यैव भागैकममृतस्य च ॥ ६.८२ ॥

तत्सर्वं मर्दयेत्सूक्ष्मं शुष्कं यामं भिषग्वरः ।

शृङ्गवेराम्बुना देयो व्योषचित्रकसैन्धवैः ।

गुञ्जाद्वयमितस्तापं हरत्येष विनिश्चयः ॥ ६.८३ ॥

सेवनविधिः

घनसारेण युक्तेन चन्दनेन विलेपयेत् ॥ ६.८४ ॥

विदध्यात्कांस्यपात्रेण जीवयेद्रोगिणं भिषक् ।

शाल्यन्नं तक्रसहितं भोजयेद्बिल्वसंयुतम् ॥ ६.८५ ॥

सन्निपाते महाघोरे त्रिदोषे विषमज्वरे ।

आमवाते वातशूले गुल्मे प्लीह्नि जलोदरे ॥ ६.८६ ॥

शीतपूर्वे दाहपूर्वे विषमे सततज्वरे ।

अग्निमान्द्ये च वाते च प्रयोज्योऽयं रसेश्वरः ॥ ६.८७ ॥

मृतसंजीवनं नाम ख्यातोऽयं रससागरे ॥ ६.८८ ॥

रविसुन्दररसः

द्विभागतालेन हतं च ताम्रं रसं

च गन्धं च विषं समं स्यात् ।

जयपालबीजं द्विगुणं च दद्यात्

त्रिसप्तवारेण दिवाकरांशौ ॥ ६.८९ ॥

विमर्द्य निम्बस्वरसेन[1] चूर्णं

गुञ्जैकमानं सितया समेतम् ।

ज्वराङ्कुशोऽयं रविसुन्दराख्यो

ज्वरान्निहन्त्यष्टविधान् समग्रान् ॥ ६.९० ॥

सन्निपातभैरवरसः

ताम्रगन्धरसश्वेतस्पन्दामरिचपूतनाः ।

समीनपित्तजैपाला[2]स्तुल्या एकत्र मर्दिताः ॥ ६.९१ ॥

गुञ्जाचतुष्टयं चास्या नवज्वरहरः परः ।

ज्वराङ्कुशः संनिपातभैरवोऽयं प्रकाशितः ॥ ६.९२ ॥

भस्मेश्वररसः

भस्मषोडशनिष्कं स्यादारण्योपलकोद्भवम् ।

निष्कत्रयं च मरिचं विषं निष्कं च चूर्णयेत् ॥ ६.९३ ॥

अयं भस्मेश्वरो नाम सन्निपातनिकृन्तनः ।

पञ्चगुञ्जामितो भक्षेदार्द्रकस्य रसेन च ॥ ६.९४ ॥

प्रतापलङ्केश्वररसः

अपामार्गस्य मूलस्य चूर्णं चित्रकमूलजैः ।

---

[1] ख- रिष्टस्वरसेन | निम्बः ....भा.प्र.पू.मिश्र.४.८१||

[2] ख- जेपाला......अपपाठः | जैपालः..रा.नि.६.६;१६५ ||

वल्कलैर्मर्दयित्वा च रसं वस्त्रेण गालयेत् ॥ ६.९५ ॥

तेन सूतसमं गन्धमभ्रकं दरदं विषम् ।

टङ्कणं तालकं चैव मर्दयेद्दिनसप्तकम् ॥ ६.९६ ॥

त्रिदिनं मुशलीकन्दैर्भावयेद्घर्मरक्षितम् ।

मूषां च गोस्तनाकारामापूर्य परिढक्कयेत् ॥ ६.९७ ॥

सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा पुटेल्लघु ।

रसतुल्यं लोहवङ्गौ रजतं ताम्रकं तथा ॥ ६.९८ ॥

मधूकसारजलदौ रेणुका गुग्गुलुः शिला ।

चव्यकं च समांशं स्याद्भागार्द्धं शोधितं विषम् ॥ ६.९९ ॥

तत्सर्वं मर्दयेत्खल्वे भावयेद्विषनीरतः ।

आतपे सप्तधा तीव्रे मर्दयेद्घटिकाद्वयम् ॥ ६.१०० ॥

कटुत्रयकषायेण कनकस्य रसेन च ।

फलत्रयकषायेण मुनिपुष्परसेन च ॥ ६.१०१ ॥

समुद्रफलनीरेण विजयावारिणा तथा ।

चित्रकस्य कषायेण ज्वालामुख्या रसेन च ॥ ६.१०२ ॥

प्रत्येकं सप्तधा भाव्यं तद्वत्पिष्टं च भावयेत् ।

सर्वस्य समभागेन विषेण परिधूपयेत् ॥ ६.१०३ ॥

दिनं विमर्दयित्वाथ रक्षयेत्कूपिकान्तरे ।

गुञ्जैकं वह्निनीरेण शृङ्गवेररसेन वा ॥ ६.१०४ ॥

प्रदद्याद्रोगिणे तीव्रमोहविस्मृतिशान्तये ।

शस्त्रेण तालुमाहत्य मर्दयेदार्द्रनीरतः ॥ ६.१०५ ॥

नोद्घटन्ते यदा दन्तास्तदा कुर्यादमुं विधिम् ।

सेचयेन्मन्त्रयित्वाथ वारां कुम्भशतैर्मुहुः ॥ ६.१०६ ॥

भोजनेच्छा यदा तस्य जायते रोगिणस्तदा ।

दध्योदनं सितायुक्तं दद्यात्तक्रं सजीरकम् ॥ ६.१०७ ॥

पाने पानं सितायुक्तं यदीच्छति तदा ददेत् ।

एवं कृते न शान्तिः स्यात्तापस्य रसजस्य च ॥ ६.१०८ ॥

सेवनविधिः

सचन्द्रचन्दनरसोल्लेपनं कुरु शीतलम् ।

तूलिकामल्लिकाजातीपुन्नागबकुलावृताम् ॥ ६.१०९ ॥

विधाय शय्यां तत्रस्थं लेपयेच्चन्दनैर्मुहुः ।

हावभावविलासोक्तिकटाक्षचञ्चलेक्षणैः ॥ ६.११० ॥

पीनोत्तुङ्गकुचोत्पीडैः कामिनीपरिरम्भणैः ।

रम्यवीणानिनादाद्यैर्गायनैः श्रवणामृतैः ॥ ६.१११ ॥

पुण्यश्लोकपुराणानां कथासम्भाषणैः शुभैः ।

एभिः प्रकारैस्तापस्य जायते शमनं परम् ॥ ६.११२ ॥

वर्जयेन्मैथुनं तावद्यावन्नो बलवान् भवेत् ।

दद्याद्वातादिरोगेषु सिन्धुगुग्गुलवह्निभिः ॥ ६.११३ ॥

दद्यात्कणामाक्षिकाभ्यां कामलाक्षयपाण्डुषु ।

तत्तद्रोगानुपानेन सर्वरोगेषु योजयेत् ॥ ६.११४ ॥

अयं प्रतापलङ्केशः सन्निपातनिकृन्तनः ॥ ६.११५ ॥

महोदधिरसः

सूतकं गन्धकं लोहं विषं चापि वराटकम् ।

ताम्रकं वङ्गभस्माथ अभ्रकं च समांशकम् ॥ ६.११६ ॥

त्रिकटुं पत्रमुस्तं च विडङ्गं नागकेशरम् ।

रेणुकामलकं चैव पिप्पलीमूलमेव च ॥ ६.११७ ॥

एषां च द्विगुणं[1] भागं[2] मर्दयित्वा प्रयत्नतः ।

भावना तत्र दातव्या गजपिप्पलिकाम्बुना ॥ ६.११८ ॥

मात्रा चणकमाना तु वटिकेयं प्रकीर्तिता ।

श्वासं हन्ति तथा कासमर्शांसि च भगन्दरम् ॥ ६.११९ ॥

हृच्छूलं पार्श्वशूलं च कर्णरोगं कपालिकम् ।

---

[1] ख- द्विगुणो.....अपपाठः ।

[2] ख- भागो.......अपपाठः ।

हरेत्संग्रहणीरोगमष्टौ च जाठराणि च ।

प्रमेहविंशतिं चैव अश्मरीं च चतुर्विधाम् ॥ ६.१२० ॥

न चान्नपाने परिहारमस्ति न शीतवाताध्वनि मैथुने च ।

यथेष्टचेष्टाभिरतः प्रयोगे नरो भवेत्काञ्चनराशिगौरः ॥६.१२१ ॥

महोदधिवटी

एकैकं विषसूतं च जाती टङ्कं द्विकं द्विकम् ।

कृष्णात्रिकं विश्वषट्कं दग्धं कपर्दिकद्विकम् ॥ ६.१२२ ॥

देवपुष्पं बाणमितं सर्वं संमर्द्य यत्नतः ।

महोदध्याख्यवटिका नष्टस्याग्नेश्च दीपनी ॥ ६.१२३ ॥[1]

उन्मत्तरसः

रसं च गन्धकं चैव धत्तूरफलजैर्द्रवैः ।

मर्दयेद्दिनमेकं च तुल्यं त्रिकटुकं क्षिपेत् ॥ ६.१२४ ॥

उन्मत्ताख्यरसो नाम सन्निपातनिकृन्तनः ।

कस्तेन न कृतो धर्मः कां च पूजां न सोऽर्हति ।

सन्निपातार्णवे मग्नं योऽभ्युद्धरति देहिनम् ॥ ६.१२५ ॥

संज्ञाकरणरसः

वचा रसोनकटुकं सैन्धवं बृहतीफलम् ।

---

[1] ख- ६.२०७-२०९a

रुद्राक्षं मधुसारं च फलं सामुद्रकामृतम् ॥ ६.१२६ ॥

समभागानि चैतानि ह्यर्कक्षीरेण भावयेत् ।

भावयेन्मत्स्यपित्तेन त्रिवारं चूर्णयेत्ततः ॥ ६.१२७ ॥

धमनं कथितं श्रेष्ठं सन्निपाते सुदारुणे ।

कफोल्वणेऽतिवाते च अपस्मारे हलीमके ॥ ६.१२८ ॥

शिरोरोगे कर्णरोगे नेत्ररोगे विधानतः ।

दापयेद्घ्राणछिद्राभ्यां संज्ञाकरणमुत्तमम् ॥ ६.१२९ ॥

चन्द्रशेखररसः

शुद्धं सूतं समं गन्धं मरिचं टङ्कणं तथा ॥ ६.१३० ॥

चतुस्तुल्या सिता योज्या मत्स्यपित्तेन भावयेत् ।

त्रिदिनं मर्दयेत्तेन रसोऽयं चन्द्रशेखरः ॥ ६.१३१ ॥

द्विगुञ्जमार्द्रकद्रावैर्देयं शीतोदकं पुनः ।

तक्रभक्तं च वृन्ताकं पथ्यं तत्र निधापयेत् ॥ ६.१३२ ॥

कनकसुन्दररसः

हिङ्गुलं मरिचं गन्धं पिप्पलीं टङ्कणं विषम् ॥ ६.१३३ ॥

कनकस्य च बीजानि समांशं विजयारसैः ।

मर्दयेद्याममात्रं तु चणमात्रा वटी कृता ॥ ६.१३४ ॥

भक्षणाद्ग्रहणीं हन्याद्रसः कनकसुन्दरः ।

अग्निमान्द्यं ज्वरं तीव्रमतिसारं च नाशयेत् ॥ ६.१३५ ॥

दध्यन्नं दापयेत्पथ्यं गव्याज्यं तक्रमेव च ।[1]

ग्रहणीदोषिणां तक्रं दीपनं ग्राहिलाघवम् ।

पथ्यं मधुरपाकित्वान्न च पित्तप्रकोपनम् ॥ ६.१३६ ॥

रामबाणरसः

सूतकं गन्धकं चैव शाणं शाणं च गृह्यते ॥ ६.१३७ ॥

दरदं टङ्कणं चैव मरिचं च विषं तथा ।

चत्वारौषधयः सर्वे द्विद्विटङ्कं च कथ्यते ॥ ६.१३८ ॥

जैपालबीजं संयोज्यं टङ्कं च दिक्प्रमाणतः ।

तिन्तिडीरससंमर्द्यं गुञ्जामात्रवटी कृता ॥ ६.१३९ ॥

तुलसीपत्रसंयुक्ता सर्वे च विषमज्वराः ।

ऐकाहिकं[2] **द्व्याहिकं च त्र्याहिकं च चतुर्थकम् ॥ ६.१४० ॥**

शीतदाह्यादिकं सर्वं नाशयति च वेगतः ।

पथ्यं दुग्धौदनं देयं दधिभक्तं च भोजनम् ॥ ६.१४१ ॥

रामबाणरसो नाम सर्वरोगप्रणाशकः ॥ ६.१४२ ॥

---

[1] क,ग- नास्ति | अधिकपाठः |

[2] ख- एकाहिकं .....अपपाठः |

चन्द्रप्रभावटी

मृतं सूतं मृतं ताम्रं मृतं स्वर्णं समं समम् ।

तुल्यं च खादिरं सारं तथा मोचरसं क्षिपेत् ॥ ६.१४३ ॥

द्रवैः शाल्मलिमूलोत्थैर्मर्दयेत्प्रहरद्वयम् ।

चणमात्रां वटीं भक्षेन्निष्कैकं जीरकैः सह ।

त्रिदोषोत्थमतीसारं सज्वरं नाशयेद्ध्रुवम् ॥ ६.१४४ ॥

चित्राम्बररसः

शुद्धसूतं मृतं चाभ्रं गन्धकं मर्दयेत्समम् ।

लोहपात्रे घृताभ्यक्ते यामं मृद्वग्निना पचेत् ॥ ६.१४५ ॥

चालयेल्लोहदण्डेन ह्यवतार्य विभावयेत् ।

त्रिदिनं जीरकैः क्वाथैर्मासैकं भक्षयेन्नरः ॥ ६.१४६ ॥

रसश्चित्राम्बरो नाम ग्रहणीं रक्तसंयुताम् ।

शमयेदनुपानेन आमशूलं प्रवाहिकाम् ॥ ६.१४७ ॥

ग्रहणीकपाटरसः (१)

तारमौक्तिकहेमायः सारश्चैकैकभागिकाः ।

द्विभागो गन्धकः सूतस्त्रिभागो मर्दयेद्दिनम् ॥ ६.१४८ ॥

कपित्थस्वरसैर्गाढं मृगशृङ्गे ततः क्षिपेत् ।

पुटेन्मध्यपुटेनैव तत उद्धृत्य मर्दयेत् ॥ ६.१४९ ॥

बलारसैः सप्तधैवमपामार्गरसैस्त्रिधा ।

लोध्रप्रतिविषामुस्ताधातकीन्द्रयवामृताः ॥ ६.१५० ॥

प्रत्येकमेषां स्वरसैर्भावना स्यात्त्रिधा त्रिधा ।

माषमात्ररसो देयो मधुना मरिचैः सह ॥ ६.१५१ ॥

हन्यात्सर्वानतीसारान्ग्रहणीं पञ्चधापि च ।

कपाटो ग्रहणीनाम रसोऽयं चाग्निदीपनः ॥ ६.१५२ ॥

ग्रहणीकपाटरसः (२)

मुक्तासुवर्णं रसगन्धटङ्कणं घनं कपर्दोऽमृततुल्यभागम् ।

सर्वैः समं शङ्खकचूर्णयुक्तं खल्वे च भाव्योऽतिविषाद्रवेण ॥ ६.१५३ ॥

गोलं च कृत्वा मृत्कर्पटस्थं संरुध्य भाण्डे हि पचेद्दिनार्धम् ।

सुस्वाङ्गशीतो रस एष भाव्यो धत्तूरवह्निमुशलीद्रवैश्च ॥ ६.१५४ ॥

लोहस्य पात्रे परिपाचितश्च सिद्धो भवेत्संग्रहणीकपाटः ।

वातोत्तरायां मरिचाज्ययुक्तः पित्तोत्तरायां मधुपिप्पलीभिः ॥ ६.१५५ ॥

श्लेष्मोत्तरायां विजयारसेन कटुत्रयेणापि युतो ग्रहण्याम् ॥ ६.१५६ ॥

क्षये ज्वरेऽप्यर्शसि विड्विकारे सामातिसारेऽरुचिपीनसे च ।

मोहे च कृच्छ्रे गतधातुवृद्धौ गुञ्जाद्वयं चापि महामयघ्नम् ॥६.१५७ ॥[1]

[1] ख- ६.१५८-१६२

वज्रकपाटरसः

मृतसूताभ्रकं गन्धं यवक्षारं सटङ्कणम् ॥ ६.१५८ ॥

अग्निमन्थं वचां कुर्यात्सूततुल्यामिमां सुधीः ।

ततो जयन्तीजम्बीरभृङ्गद्रावैर्विमर्दयेत् ॥ ६.१५९ ॥

त्रिवासरं ततो गोलं कृत्वा संशोष्य धारयेत् ।

लोहपात्रे च लवणमथोपरि[1] निधापयेत् ॥ ६.१६० ॥

अधोवह्निं शनैः कुर्याद्यामार्धं च तदुद्धरेत् ।

रसतुल्यामतिविषां दद्यान्मोचरसं तथा ॥ ६.१६१ ॥

कपित्थविजयाद्रावैर्भावयेत्सप्तधा भिषक् ।

धातकीन्द्रयवमुस्तालोध्रबिल्वगुडूचिकाः ॥ ६.१६२ ॥

एतद्रसैर्भावयित्वा वारैकं च विशोषयेत् ।

रसवज्रं कपाटाख्यं माषैकं मधुना लिहेत्[2] ॥ ६.१६३ ॥

वह्निः शुण्ठी विडङ्गापि बिल्वं च लवणं समम् ।

पिबेदुष्णाम्बुना चानु सर्वजां ग्रहणीं जयेत् ॥ ६.१६४ ॥[3]

---

[1] ख- लवणं अधोपरि

[2] अपपाठः ...अपाणिनीयम् | लिह आस्वादने [धा.पा.०२.६], लिह्यात् इत्यपेक्ष्यते|

[3] ख- ६.१५१-१५७ ||

विजयभैरवरसः

सूतकं गन्धकं लोहं विषं चित्रकमभ्रकम् ।

विडङ्गं रेणुका मुस्ता एला केशरपत्रकम् ।

फलत्रयं त्रिकटुकं शुल्बभस्म तथैव च ॥ ६.१६५ ॥

एतानि समभागानि द्विगुणो दीयते गुडः ।

कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ॥ ६.१६६ ॥

सूतायां ग्रहणीमान्द्ये शूले पाण्ड्वामये तथा ।

हस्तपादादिरोगेषु गुटिकेयं प्रशस्यते ॥ ६.१६७ ॥

आनन्दभैरवरसः

दरदं वत्सनाभं च मरिचं टङ्कणं कणा ॥ ६.१६८ ॥

चूर्णयेत्समभागेन रसो ह्यानन्दभैरवः ।

गुञ्जैकं तु द्विगुञ्जं वा बलं ज्ञात्वा प्रयोजयेत् ॥ ६.१६९ ॥

मधुना लेहयेच्चानु कुटजस्य फलत्वचम् ।

चूर्णितं कर्षमात्रं तु त्रिदोषस्यातिसारजित् ॥ ६.१७० ॥

दध्यन्नं दापयेत्पथ्यं गव्याजं तक्रमेव च ।

पिपासायां जलं शीतं हिता च विजया निशि ॥ ६.१७१ ॥

मेघडम्बररसः

तण्डुलीयजलैः[1] पिष्टं सूततुल्यं च गन्धकम् ।

अन्धमूषागतं पक्त्वा भूधरे भस्मतां नयेत् ॥ ६.१७२ ॥

दशमूलकषायेण भावयेत्प्रहरद्वयम् ।

गुञ्जाद्वयं हरत्याशु हिक्कां कासं ज्वरं तथा ।

अनुपानेन दातव्यो रसोऽयं मेघडम्बरः ॥ ६.१७३ ॥

त्रिगुणाख्यरसः

गन्धकाद्द्विगुणं सूतं शुद्धं मृद्वग्निना क्षणम् ॥ ६.१७४ ॥

पक्त्वावतार्य संचूर्ण्य चूर्णतुल्याभयायुतम् ।

सप्तगुञ्जामितं खादेद्वर्धयेच्च दिने दिने ॥ ६.१७५ ॥

गुञ्जैकं च क्रमेणैव यावत्स्यादेकविंशतिः ।

क्षीराज्यशर्करामिश्रं शाल्यन्नं पथ्यमाचरेत् ॥ ६.१७६ ॥

कम्पवातप्रशान्त्यर्थं निर्वाते निवसेत्सदा ।

त्रिगुणाख्यो रसो नाम्ना[2] त्रिपक्षात्कम्पवातनुत् ॥ ६.१७७ ॥

---

[1] ख- तन्दुलीयजलैः

[2] क- नाम

वातरिपुरसः[1]

सूतहाटकवज्राणि तारं लोहं च माक्षिकम् ।

तालं नीलाञ्जनं तुत्थमब्धिफेनं समांशकम् ॥ ६.१७८ ॥

पञ्चानां लवणानां च भागमेकं विमर्दयेत् ।

वज्रक्षीरैर्दिनैकं तु रुद्ध्वा तं भूधरे पुटेत् ॥ ६.१७९ ॥

माषैकमार्द्रकद्रावैर्लेहयेद्वातनाशनम् ।

पिप्पलीमूलजं क्वाथं सकृष्णमनुपाययेत् ॥ ६.१८० ॥

सर्ववातविकारांस्तु निहन्त्याक्षेपकादिकान् ।

रसः सर्वत्र विख्यातो नाम वातरिपुः स्मृतः ॥ ६.१८१ ॥

वातगजाङ्कुशरसः

मृतं लोहं सूतगन्धं ताम्रतालकमाक्षिकम् ।

पथ्यां शृङ्गीविषं त्र्यूषमग्निमन्थं च टङ्कणम् ॥ ६.१८२ ॥

तुल्यं खल्वे दिनं मर्द्य[2] मुण्डीनिर्गुण्डिजैर्द्रवैः ।

द्विगुञ्जां वटिकां खादेत्सर्ववातप्रशान्तये ।

साध्यासाध्यं निहन्त्याशु रसो वातगजाङ्कुशः ॥ ६.१८३ ॥

---

[1] ख- अथ वातारिरसः ।

[2] छान्दसरूपम् ।

अम्लपित्तान्तकरसः

मृतसूताभ्रलोहानां तुल्यां पथ्यां विचूर्णयेत् ।

माषत्रयं लिहेत्[1] क्षौद्रैरम्लपित्तप्रशान्तये ॥ ६.१८४ ॥

अग्निकुमाररसः (१)

सूतं गन्धं च नागानां चूर्णं हंसाङ्घ्रिवारिणा ।

दिनं घर्मे विमर्द्याथ गोलिकां तस्य योजयेत् ॥ ६.१८५ ॥

काचकूप्यां[2] च संवेष्ट्य तां त्रिभिर्मृत्पुटैर्दृढम् ।

मुखं संरुध्य संशोष्य स्थापयेत्सिकताह्वये ॥ ६.१८६ ॥

सार्धं दिनं क्रमेणाग्निं ज्वालयेत्तदधस्ततः ।

स्वाङ्गशीतं समुद्धृत्य षडंशेनामृतं क्षिपेत् ॥ ६.१८७ ॥

मरिचान्यर्द्धभागेन समं वास्याथ मर्दयेत् ।

अयमग्निकुमाराख्यो रसो मात्रास्य रक्तिका ॥ ६.१८८ ॥

ताम्बूलीरससंयुक्तो हन्ति रोगानमूनयम् ।

वातरोगान् क्षयं श्वासं कासं पाण्डुकफोल्बणम् ॥ ६.१८९ ॥

अग्निमान्द्यं सन्निपातं पथ्यं शाल्यादिकं लघु ।

जलयोगप्रयोगोऽपि शस्तस्तापप्रशान्तये ॥ ६.१९० ॥

---

[1] द्रष्टव्यम्- तलटिप्पणी-६.१६३.३

[2] क,ग- काचकुप्यां........अपपाठः |

अग्निकुमाररसः (२)

टङ्कणं रसगन्धौ च समभागं त्रयो विषम् ।

कपर्दिसर्जिकाक्षारमागधीविश्वभेषजम् ॥ ६.१९१ ॥

पृथक्पृथक्कर्षमात्रं त्वष्टभागं मरीचकम् ।

जम्बीराम्लैर्दिनं पिष्टं भवेदग्निकुमारकः ।

विषूचिशूलवातादिवह्निमान्द्यप्रशान्तये ॥ ६.१९२ ॥[1]

लीलाविलासरसः

रसो रविर्व्योम बलिः सुलोहं धात्र्यक्षनीरैस्त्रिदिनं विमर्द्य ।

तदल्पघृष्टं मृदुमार्कवेण संमर्दयेदस्य च वल्लयुग्मम् ॥ ६.१९३ ॥

हन्त्यम्लपित्तं मधुनावलीढं लीलाविलासो रसराज एषः ।

दुग्धं सकूष्माण्डरसं सधात्रीफलं शनैस्तत्सहितं भजेद्वा ॥ ६.१९४ ॥

मन्थानभैरवरसः

मृतं सूतं मृतं ताम्रं हिङ्गुपुष्करमूलकम् ।

सैन्धवं गन्धकं तालं टङ्कणं चूर्णयेत्समम् ॥ ६.१९५ ॥

पुनर्नवादेवदारुनिर्गुण्डीतण्डुलीयकैः ।

तिक्तकोशातकीद्रावैर्दिनैकं मर्दयेद्दृढम् ॥ ६.१९६ ॥

माषमात्रं लिहेत्क्षौद्रै रसो मन्थानभैरवः ।

---

[1] ख- ६.१९४-१९५||

कफरोगप्रशान्त्यर्थं निम्बक्वाथं पिबेदनु ॥ ६.१९७ ॥

क्रव्यादरसः

पलं रसस्य द्विपलं बलेः स्याच्छुल्वायसी चार्धपलप्रमाणे ।

संचूर्ण्य सर्वं द्रुतमग्नियोगादेरण्डपत्रेषु निवेशनीयम् ॥ ६.१९८ ॥

पिष्ट्वाथ तां पर्पटिकां निदध्याल्लोहस्य पात्रे वरपूतमस्मिन् ।

जम्बीरजं पक्वरसं पलानां शतं नियोज्याग्निमथाम्लमात्रम् ॥ ६.१९९ ॥

जीर्णे रसे भावितमेतदेतैः सपञ्चकोलोद्भववारिपूरैः ।

सवेतसाम्लैः शतमत्र योज्यं समं रजष्टंकणजं सुभृष्टम्॥६.२०० ॥

विडं तदर्धं मरिचं समं च तत्सप्तधार्द्रं चणकाम्लवारि ।

क्रव्यादनामा भवति प्रसिद्धो रसः सुमन्थानकभैरवोक्तः ।

माषद्वयं सैन्धवतक्रपीतमेतसुधन्यं[1] खलु भोजनान्ते ॥६.२०१ ॥

गुरूणि मांसानि पयांसि पिष्टीघृतानि खाद्यानि फलानि वेगात् ।

मात्रातिरिक्तान्यपि सेवितानि यामद्वयाज्जारयति प्रसिद्धः ॥ ६.२०२ ॥

अग्नितुण्डीवटी

शुद्धं सूतं विषं गन्धमजमोदाफलत्रयम् ।

सर्ज्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् ॥ ६.२०३ ॥

---

[1] क,ग- ......मेतसुधन्यं |

सौवर्चलं विडङ्गानि सामुद्रं टङ्कणं[1] समम् ।

विषं पुष्टं[2] सर्वतुल्यं जम्बीराम्लेन मर्दयेत् ॥ ६.२०४ ॥

मरिचाभां वटीं खादेद्वह्निमांद्यप्रशान्तये ॥ ६.२०५ ॥

आनन्दोदयरसः

पारदं गन्धकं लोहमभ्रकं विषमेव च ।

समांशं मरिचं चाष्टौ टङ्कणं च चतुर्गुणम् ॥ ६.२०६ ॥

भृङ्गराजरसैः सप्त भावनाश्चाम्लदाडिमैः ।

गुञ्जाद्वयं पर्णखण्डैर्हन्ति सायं तु भक्षितः ॥ ६.२०७ ॥

वातश्लेष्मोद्भवान्रोगान्मन्दाग्निग्रहणीज्वरान् ।

अरुचिं पाण्डुतां चैव जयेदचिरसेवनात् ॥ ६.२०८ ॥

चिन्तामणिरसः

रसं गन्धं मृतं शुल्बं मृतमभ्रं फलत्रिकम् ।

त्र्यूषणं बीजजैपालं समं खल्वे विमर्दयेत् ॥ ६.२०९ ॥

द्रोणपुष्पीरसैर्भाव्यं शुष्कं तद्वस्त्रगालितम् ।

चिन्तामणिरसोऽप्येष अजीर्णानां प्रशस्यते ॥ ६.२१० ॥

ज्वरमष्टविधं हन्ति सर्वशूलेषु शस्यते ।

---

[1] ख- त्र्यूषणं

[2] क,ग- विषमुष्टिं

गुञ्जैको वा द्विगुञ्जो वा आमरोगहरः परः ॥ ६.२११ ॥

राजवल्लभरसः

रसनिष्कैकगन्धैकं निष्कमात्रः प्रदीपनः ॥ ६.२१२ ॥

सार्धं पलं प्रदातव्यं चूलिकालवणं भिषक् ।

खल्वे संमर्दयेत्तत्तु शुष्कवस्त्रेण गालयेत् ॥ ६.२१३ ॥

माषमात्रं प्रदातव्यो मुक्तमांसादिजारकः ।

अजीर्णेषु त्रिदोषेषु देयोऽयं राजवल्लभः ॥ ६.२१४ ॥

त्रिनेत्राख्यरसः

टङ्कणं हारिणं शृङ्गं स्वर्णं शुल्बं मृतं रसम् ।

दिनैकमार्द्रकद्रावैर्मर्द्य रुद्ध्वा पुटे पचेत् ॥ ६.२१५ ॥

त्रिनेत्राख्यो रसो नाम्ना माषैकं मधुसर्पिषा ।

सैन्धवं जीरकं हिङ्गुमध्वाज्याभ्यां लिहेदनु ।

पङ्क्तिशूलहरं ख्यातं याममात्रान्न संशयः ॥ ६.२१६ ॥

मेहवज्ररसः

भस्म सूतं मृतं कान्तं शुल्बभस्म शिलाजतु ।

शुद्धताप्यं शिला व्योषं त्रिफलाङ्कोल[1]बीजकम् ॥ ६.२१७ ॥

कपित्थरजनीचूर्णं भृङ्गराजेन भावयेत् ।

---

[1] ख- कोह्लबीजकम् ....अपपाठः |

विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा ॥ ६.२१८ ॥

निष्कमात्रं लिहेन्मेही मेहवज्रो महारसः ।

महानिम्बस्य बीजानि पिष्ट्वा कर्षमितानि च ॥ ६.२१९ ॥

पलं तण्डुलतोयेन घृतनिष्कद्वयेन च ।

एकीकृत्य पिबेत्तोयं हन्ति मेहं चिरन्तनम्[1] ॥ ६.२२० ॥

इन्द्रवटीरसः

मृतं सूतं मृतं वङ्गमर्जुनस्य त्वचा सिता[2] ।

तुल्यांशं मर्दयेत्खल्वे शाल्मल्या मर्दयेद्द्रवैः[3] ॥ ६.२२१ ॥

दिनान्ते वटिका कार्या माषमात्रा प्रमेहहा ।

एषा इन्द्रवटी नाम्ना मधुमेहप्रशान्तये ॥ ६.२२२ ॥

रसेन्द्रमङ्गलरसः

तालसत्त्वं मृतं ताम्रं मृतं लोहं मृतं रसम् ।

हतमभ्रं हतं तारं गन्धं तुत्थं मनःशिला ॥ ६.२२३ ॥

सौवीराञ्जनकासीसं नील[4]भल्लातकानि च ।

शिलाजत्वर्कमूलं तु कदलीकन्दचित्रकम् ॥ ६.२२४ ॥

---

[1] क,ग- चिरोत्थितम्

[2] क,ग- त्वचान्वितम्

[3] क,ग- मूलजैर्द्रवैः

[4] क,ग- नीली......the Indian fig tree(=वट)[MW.pg.५६६],

त्वचमङ्कोलजां कृष्णां कृष्णधत्तूरमूलकम् ।

अवल्गुजानि[1] बीजानि गौरीमाध्वीफलानि च ॥ ६.२२५ ॥

हेमाह्वां फेनजात्यां च फलिनीं विषतिन्दुकम्[2] ।

तैलिन्यो लोहकिट्टं च पुराणममृतं च तत् ॥ ६.२२६ ॥

त्वचा च मीनकाक्षस्य पुनरुक्तं पलं[3] पृथक् ।

तैलिन्यो वटकास्तासु सर्वमेकत्र चूर्णयेत् ॥ ६.२२७ ॥

खल्वे निधाय दातव्या पुनरेषां च भावना ।

ब्रह्मदण्डी शिखापुङ्खा देवदाली च नीलिका ॥ ६.२२८ ॥

वाणशोना नृपतरुर्निम्बसारो बिभीतकः ।

करञ्जो भृङ्गराजश्च गायत्री तिन्तडीफलम् ॥ ६.२२९ ॥

मलयूमूलमेतेषां तिस्रस्तिस्रस्तु भावनाः ।

दातव्या कुप्पिकां कृत्वा सम्यक्संशोष्य चातपे ॥ ६.२३० ॥

भाण्डे तद्धारयेद्भाण्डं मुद्रितं चाथ कारयेत् ।

यामं मन्दाग्निना पच्यात्पुटमध्ये ह्यसौ रसः ॥ ६.२३१ ॥

पुण्डरीकं निहन्त्येव नात्र कार्या विचारणा ।

---

[1] The plant Vernonia Anthelminthica [MW,pg.104], सु.सू.४६.२६५, सु.चि.९.२१

[2] ख- तिन्दुकाम् ....अपपाठः| तिन्दुकः-सु.सू.४२.११;४६.१६३,१६८;सु.शा.१०.५

[3] ख- फलं

द्विमासाभ्यन्तरे पुंसामपथ्यं न तु भोजयेत् ॥ ६.२३२ ॥

रोगाः सर्वे विलीयन्ते कुष्ठानि सकलानि च ।

भानुभक्तिप्रवृत्तानां गुरुभक्तिकृतां सदा ॥ ६.२३३ ॥

रसेन्द्रमङ्गलो नाम्ना रसोऽयं प्रकटीकृतः ।

अनुग्रहाय भक्तानां शिवेन करुणात्मना ॥ ६.२३४ ॥

सर्वेश्वररसः

मृतताम्राभ्रलोहानां हिङ्गुलं च पलं पलम् ।

जम्बीरोन्मत्तभाङ्ग्र्गी[1]भिः स्नुह्य[2]र्कविषमुष्टिभिः ॥ ६.२३५ ॥

मर्द्यं हयारिजैर्द्रावैः प्रत्येकं च दिनं दिनम् ।

एवं सप्तदिनं मर्द्यं तद्गोलं वस्त्रवेष्टितम् ॥ ६.२३६ ॥

वालुकायन्त्रगं स्वेद्यं त्रिदिनं लघुवह्निना ।

आदाय चूर्णयेत्सर्वं पलैकं योजयेद्विषम् ॥ ६.२३७ ॥

द्विपलं पिप्पलीचूर्णमिश्रं सर्वेश्वरं रसम् ।

द्विगुञ्जं लेहयेत्क्षौद्रैर्मुनिमण्डलकुष्ठनुत् ॥ ६.२३८ ॥

वाकुची चैव दारू च कर्षमात्रं विचूर्णितम् ।

---

[1] Clerodendrum Siphonantus, [MW.pg.753], रा.नि.६.१४९,१५१||

[2] स्नुही- मिश्रेयाप्यथ सीहुण्डो वज्रो स्नुक्स्त्री स्नुही गुडा || अमर.२.४.१०५.२.५||
रा.नि.८.२,४९,५१,५२ ||

लिहेदेरण्डतैलेन ह्यनुपानं सुखावहम् ॥ ६.२३९ ॥

रक्ताधिक्ये सिरामोक्षः पादे बाहौ ललाटके ।

कर्तव्यो दृष्टिरोगेषु कुष्ठिनां च विशेषतः ॥ ६.२४० ॥

बलिनो बहुदोषस्य वयःस्थस्य शरीरिणः ।

एतत्प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥ ६.२४१ ॥

व्यभ्रे वर्षासु विद्यात्तु ग्रीष्मकाले तु शीतले ।

हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयः स्मृताः ॥ ६.२४२ ॥

तालेश्वररसः (१)

द्वादशं कर्षतालं च कूष्माण्डस्वरसे क्षिपेत् ।[1]

स्वेदयेद्दोलकायन्त्रे[2] **यावत्तोयं न विद्यते ॥ ६.२४३ ॥**

पश्चात्तं मेलयेत्[3] **खल्वे सूतं कर्षद्वयं क्षिपेत् ।**

तन्मर्द्यं बहुवारीणि नीलाभा कज्जली भवेत् ॥ ६.२४४ ॥[4]

स्नुहीक्षीरं रविक्षीरं छागी[5] **गोक्षुर**[6]**वाकुची ।**

---

[1] क,ग- कर्षा द्वादश तालस्य कूष्माण्डरससंभृते ।

[2] क,ग- ....दोलिकायन्त्रे

[3] क,ग- शोषयेत्

[4] क,ग- घर्षयेद्बहुधा तत्तु यावत्कज्जलिका भवेत् ।

[5] ख- झागीक्षीरं......अपपाठः ।

[6] ख- नास्ति

पातालगरुडा[1]ङ्कोल[2]चक्रमर्दकहिज्जलाः[3] ॥ ६.२४५ ॥

कुमारीपत्रभल्लाता त्रिफला तु पुनर्नवा ।[4]

निम्बत्वगेभिर्भैषज्यैः[5] पुटनाच्च[6] त्रयं त्रयम् ॥ ६.२४६ ॥

षट्कर्षं कलिकाचूर्णं[7] हण्डिकायां तु धारयेत् ।

चतुर्थांशमधः स्थाप्यं मध्ये स्थाप्यं तु तालकम् ॥ ६.२४७ ॥

पश्चादुपरि चूर्णं तु सर्वं स्थाप्यं प्रयत्नतः ।

हण्डिकाखण्डपर्यन्तं मज्जानं कन्यकोद्भवम् ॥ ६.२४८ ॥[8]

ततो मुद्रां दृढं कुर्यादूर्ध्वास्यं रोधितं किल ।[9]

तस्योपरि शिलां दत्त्वा दृढा न च चलेद्यथा ॥ ६.२४९ ॥[10]

---

[1] ख- पातालगरुडी | पातालगरुडी-a species of creeper [MW.pg.616], भा.प्र.पू.मिश्र.४.२२१||

[2] ख- कोह्ला

[3] ख- ....हिज्जलम् | भा.प्र.पू.मिश्र.४.१२०|| Barringtonia Acutangula [(C.P.Khare, 2007)pg.83],

[4] क,ग- कुमार्युन्मत्तभल्लातत्रिफलाम्बुपुनर्नवाः

[5] ख- निम्बत्वचं महौषध्या |

[6] ख- पुटं देयं |

[7] ख- चूककालिकां

[8] क,ग- हण्डिकां कण्ठपर्यन्तां कुमारीरसयोगतः |

[9] क, ग- पूरयेच्च ततो मुद्रां दृढां कुर्यात्प्रयत्नतः

[10] ख- नास्ति |

चतुर्यामं तु दीपाग्निं[1] विंशद्यामं[2] हठाग्निना[3] ।

स्वाङ्गशीतलमुद्धृत्य भवेत्[4] तालेश्वरो रसः ॥ ६.२५० ॥

कुष्ठनाशः परः ख्यातो भैरवानन्दयोगिना ।

पथ्यं मुद्गाम्बुशाल्यन्नं भिषगत्र प्रयोजयेत् ॥ ६.२५१ ॥

तालेश्वररसः (२)

सूतो द्वौ वल्गुजा त्रीणि कणा विश्वा त्रिकं त्रिकम् ॥ ६.२५२ ॥

सार्धकं ब्रह्मपुत्रस्य मरिचस्य चतुष्टयम् ।

एकैकं निम्बधत्तूरबीजतो गन्धकत्रयम् ॥ ६.२५३ ॥

जातीटङ्कणतालाया भागा दश दश स्मृताः ।

युक्त्या सर्वं विमर्द्याथामृतास्वरसभाविताः ॥ ६.२५४ ॥

सप्तधा शोषयित्वाथ धत्तूरस्यैव दापयेत् ।

संमर्द्य गोलकं सार्द्रं धत्तूरैर्वेष्टयेद्दलैः ॥ ६.२५५ ॥

गोमये वेष्टयेत्तच्च कुक्कुटाख्यपुटे पचेत् ।

रसः कुष्ठहरः सेव्यः सर्वदा भोजनप्रियैः ॥ ६.२५६ ॥[5]

---

[1] क,ग- दीपाग्ना ......अपपाठः |

[2] ख- विद्याद्यामं

[3] ख- हताग्निना

[4] क,ग- कुष्ठे

[5] ख- ६.२५९-२६३

स्वर्णक्षीरीरसः

हेमाह्वां पञ्चपलिकां क्षिप्त्वा तक्रघटे पचेत् ।

तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् ॥ ६.२५७ ॥

क्षीरे जीर्णे समुद्धृत्य क्षालयित्वा विशोषयेत् ।

चूर्णितं तत्पञ्चपलं मरिचानां पलद्वयम् ॥ ६.२५८ ॥

पलैकं मूर्च्छितं सूतमेकीकृत्वा च भक्षयेत् ।

निष्कैकं सुप्तिकुष्ठारिः[1] स्वर्णक्षीरीरसो ह्ययम् ॥ ६.२५९ ॥

शूलगजकेसरीरसः

शुद्धसूतं द्विधा गन्धं यामैकं मर्दयेद्दृढम् ।

ताम्रभस्म द्वयोस्तुल्यं सम्पुटे तं निरोधयेत् ॥ ६.२६० ॥

ऊर्ध्वाधोलवणं दत्त्वा मृद्भाण्डे धारयेद्भिषक् ।

ततो गजपुटे पक्त्वा स्वाङ्गशीतं समुद्धरेत् ॥ ६.२६१ ॥

सम्पुटं चूर्णयेत्सूक्ष्मं पर्णखण्डे द्विगुञ्जके ।

भक्षयेच्छूलपीडार्थे हिङ्गुशुण्ठीसजीरकम् ॥ ६.२६२ ॥

वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ।

असाध्यं साधयेच्छूलं रसः स्याच्छूलकेसरी ॥ ६.२६३ ॥

---

[1] ग- सुप्तिकुष्ठार्तः

व्यायामं मैथुनं मद्यं लवणं कटुकानि च ।

वेगरोधं शुक्ररोधं वर्जयेच्छूलवान्नरः ॥ ६.२६४ ॥

ब्रह्मरसः

भागैकं मूर्च्छितं सूतं गन्धकं वह्निवाकुची[1] ।

चूर्णं तु ब्रह्मबीजानां प्रतिद्वादशभागकम्[2] ॥ ६.२६५ ॥

भागांस्त्रिंशद्गुडस्यापि क्षौद्रेण गुटिका कृता ।

अयं ब्रह्मरसो नाम्ना ब्रह्महत्याविनाशनः ॥ ६.२६६ ॥

द्विनिष्कभक्षणाद्धन्ति प्रसुप्तिं कुष्ठमण्डलम् ।

पातालगरुडीमूलं जले पिष्ट्वा पिबेदनु ॥ ६.२६७ ॥

इन्दुधररसः[3]

शुद्धं सूतं समं गन्धं तुत्थं च मृतताम्रकम् ।

मर्दितं वाकुचीक्वाथैर्दिनैकं वटकीकृतम् ॥ ६.२६८ ॥

निष्कमात्रं सदा खादेच्छ्वेतघ्नेन्दुधरो रसः ।

वाकुचीतैलकर्षैकं सक्षौद्रमनुपाययेत् ॥ ६.२६९ ॥

---

[1] क,ग- गन्धावल्गुजचित्रकान्

[2] ग- ...भागिकम्

[3] ख- शशिधररसः

पारिभद्ररसः

मूर्च्छितं सूतकं धात्रीफलं निम्बस्य चाहरेत् ।

तुल्यांशं खादिरक्वाथैर्दिनं मर्द्य च भक्षयेत् ।

निष्कैकं दद्रुकुष्ठघ्नः पारिभद्राह्वयो रसः ॥ ६.२७० ॥

श्वेतारिरसः

शुद्धं सूतं समं गन्धं त्रिफलाभ्रं च वाकुची ।

भल्लातं च शिला कृष्णा निम्बबीजं समं समम् ॥ ६.२७१ ॥

मर्दयेद्भृङ्गजद्रावैः पेष्यं[1] शोष्यं पुनः पुनः ।

इत्थं कुर्यात्त्रिसप्ताहं रसं श्वेतारिको भवेत् ॥ ६.२७२ ॥

मध्वाज्यैः[2] खादयेन्निष्कं श्वेतकुष्ठं[3] विनाशयेत् ॥ ६.२७३ ॥

कालाग्निरुद्ररसः

सूताभ्रं ताम्रतीक्ष्णानां भस्म माक्षिकगन्धकम् ।

वन्ध्याकर्कोटकीद्रावै रसो मर्द्यो दिनावधि ॥ ६.२७४ ॥

वन्ध्याकर्कोटकीकन्दे क्षिप्त्वा लिप्त्वा मृदा बहिः ।

भूधराख्ये पुटे पाच्यं दिनैकं तु विचूर्णयेत् ॥ ६.२७५ ॥

---

[1] ख- शोष्यं

[2] ख- मध्वाज्ये

[3] ख- दन्तशूलं

दशमांशं विषं योज्यं माषमात्रं च भक्षयेत् ।

रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत् ॥ ६.२७६ ॥

पिप्पलीमधुसंयुक्तं ह्यनुपानं प्रकल्पयेत् ।

मकरध्वजरसः

स्वर्णादष्टगुणं सूतं मर्दयेद्द्वित्वगन्धकम् ॥ ६.२७७ ॥

रक्तकार्पासकुसुमैः कुमार्यास्त्रिदिनं ततः ।

शुष्कं काचघटे रुद्ध्वा वालुकायन्त्रगं हठात् ॥ ६.२७८ ॥

भस्म कुर्याद्रसेन्द्रस्य नवार्ककिरणोपमम् ।

भागोऽस्य भागाश्चत्वारः कर्पूरस्य सुशोभनाः ॥ ६.२७९ ॥

लवङ्गं मरिचं जातीफलं कर्पूरमात्रया ।

मेलयेन्मृगनाभिं च गद्याणकमितां ततः ॥ ६.२८० ॥

श्लक्ष्णपिष्टो रसः श्रीमाञ्जायते मकरध्वजः ।

वल्लं वल्लद्वयं वास्य ताम्बूलदलसंयुतम् ॥ ६.२८१ ॥

भक्षयेन्मधुरं स्निग्धं लघुमांसमवातुलम् ।

शृतं शीतं सितायुक्तं दुग्धं गोधूममाज्यकम् ॥ ६.२८२ ॥

माषाश्च पिष्टमपरं मद्यानि विविधानि च ।

करोत्यग्निबलं पुंसां वलीपलितनाशनः ॥ ६.२८३ ॥

मेधायुःकान्तिजनकः कामोद्दीपनकृन्महान् ।

अभ्यासात्साधकः स्त्रीणां शतं जयति नित्यशः ॥ ६.२८४ ॥

रतिकाले रतान्ते वा पुनः सेव्यो रसोत्तमः ।

मदहानिं करोत्येष प्रमदानां सुनिश्चितम् ॥ ६.२८५ ॥

कृत्रिमं स्थावरविषं जंगमं विषवारिजम् ।

न विकाराय भवति साधकानां[1] च वत्सरात् ॥ ६.२८६ ॥

मृत्युञ्जयो यथाभ्यासान्मृत्युं[2] जयति देहिनाम् ।

तथायं साधकेन्द्रस्य जरामरणनाशनः ॥ ६.२८७ ॥

मदनकामदेवरसः

तारं वज्रं सुवर्णं च ताम्रं च सूतगन्धकम् ।

लोहं च क्रमवृद्धानि कुर्यादेतानि मात्रया ॥ ६.२८८ ॥

विमर्द्य कन्यकाद्रावैर्न्यसेत्काचमये घटे ।

मुद्रितं पिठरीमध्ये धारयेत्सैन्धवैर्भृते ॥ ६.२८९ ॥

पिठरीं मुद्रयेत्सम्यक्ततश्चुल्ल्यां निवेशयेत् ।

वह्निं शनैः शनैः कुर्याद्दिनैकं तत उद्धरेत् ॥ ६.२९० ॥

स्वाङ्गशीतं च संचूर्ण्य भावयेदर्कदुग्धकैः ।

अश्वगन्धा च कङ्कोली वानरी मुशलीक्षुरः ॥ ६.२९१ ॥

---

[1] ख- साधकेन्द्रस्य

[2] ख- मृत्युञ्जयरसाभ्यासान्मृत्युं

त्रिवारं[1] स्वरसं भाव्यं शतावर्या विभावयेत् ।

पद्मकन्दकसेरूणां रसैर्भाव्यं तु एकधा ॥ ६.२९२ ॥[2]

कस्तूरीव्योषकर्पूरैः[3] कङ्कोलैलालवङ्गकम् ।

पूर्वचूर्णादष्टमांशमितचूर्णं विमिश्रयेत् ॥ ६.२९३ ॥

सर्वैः समां शर्करां च दत्त्वा शाणोन्मितं ददेत् ।

गोदुग्धद्विपलेनैव मधुराहारसेविनः ॥ ६.२९४ ॥

अस्य प्रभावात्सौन्दर्य्यं बलं तेजो विवर्धते ।

तरुणी रमते बह्वीर्वीर्यहानिर्न जायते ॥ ६.२९५ ॥

पूर्णेन्दुरसः

शाल्मल्युत्थैर्द्रवैर्मर्द्य पक्षैकं शुद्धसूतकम् ।

यामद्वयं पचेदाज्ये वस्त्रे बद्ध्वाथ मर्दयेत् ॥ ६.२९६ ॥

दिनैकं शाल्मलिद्रावैर्मर्दयित्वा वटीं कृताम् ।

वेष्टयेन्नागवल्ल्या च निःक्षिपेत्काचभाजने ॥ ६.२९७ ॥

भाजनं शाल्मलीद्रावैः पूर्णं यामद्वयं पचेत् ।

वालुकायन्त्रमध्ये तु द्रवे जीर्णे समुद्धरेत् ॥ ६.२९८ ॥

---

[1] ख- त्रिवेल....

[2] ख- पद्मकन्दकसेरूणां रसे कासस्य भावयेत् || ६.२९१ ||

[3] क- ....कपूरैः

द्विगुञ्जं भक्षयेत्प्रातर्नागवल्लीदलान्तरे ।

मुशलीं ससितां क्षीरैः पलैकं पाययेदनु ॥ ६.२९९ ॥

रसः पूर्णेन्दुनामायं सम्यग्वीर्यकरो भवेत् ।

कामिनीनां सहस्रैकं नरः कामयते ध्रुवम् ॥ ६.३०० ॥

कामिनीमदभञ्जनरसः

शुद्धं सूतं समं गन्धं त्र्यहं कह्लार[1]जद्रवैः ।

मर्दितं वालुकायन्त्रे यामैः कूपीगतं पचेत् ॥ ६.३०१ ॥

रक्ताङ्गस्य द्रवैर्भाव्यं दिनैकं तु सितायुतम् ।

यथेष्टं भक्षयेच्चानु कामयेत्कामिनीशतम् ॥ ६.३०२ ॥

मदनोदयरसः

शुद्धं सूतं समं गन्धं रक्तोत्पलदलद्रवैः ।

यामं मर्द्यं पुनर्गन्धं पूर्वादर्धं विनिष्क्षिपेत् ॥ ६.३०३ ॥

दिनैकं मर्दयेत्तत्तु पुनर्गन्धं च मर्दयेत् ।

पूर्वद्रावैर्दिनैकं तु काचकुप्यां निरुध्य च ॥ ६.३०४ ॥

दिनैकं वालुकायन्त्रे पक्वमुद्धृत्य भक्षयेत् ।

पञ्चगुञ्जा सिता सार्द्धं रसोऽयं मदनोदयः ॥ ६.३०५ ॥

---

[1] कह्लारं रक्तोत्पलं .....इति डल्हण..|| सु.सू.३९.८||

समूलं वानरीबीजं मुशली शर्करासमम् ।

गवां क्षीरेण तत्पेयं पलार्द्धमनुपानकम् ॥ ६.३०६ ॥

अनङ्गसुन्दररसः

पलद्वयं द्वयं शुद्धं पारदं गन्धकं तथा ।

मृतहेम्नस्तु कर्षैकं पलैकं मृतताम्रकम् ॥ ६.३०७ ॥

मृततारं चतुर्निष्कं मर्द्यं पञ्चामृतैर्दिनम् ।

रुद्ध्वा तु वै पुटे पश्चाद्दिनैकं तु समुद्धरेत् ॥ ६.३०८ ॥

पिष्ट्वा पञ्चामृतैः कुर्याद्वटिकां बदराकृतिम् ।

अनङ्गसुन्दरो नाम परं पुष्टिप्रदायकः ॥ ६.३०९ ॥

कामेश्वररसः

सम्यङ्मारितमभ्रकं कट्फलं कुष्ठाश्वगन्धामृता

मेथी मोचरसो विदारिमुशली गोक्षूरकं क्षूरकम् ।

रम्भाकन्दशतावरी ह्यजमुदा माषास्तिला धान्यकं

यष्टी[1]नागबला कचूरमदनं जातीफलं सैन्धवम् ॥ ६.३१० ॥

भार्ङ्गी कर्कटशृङ्गिका त्रिकटुकं जीरद्वयं चित्रकं

चातुर्जातपुनर्नवा गजकणाद्राक्षाशटी[2] वासकम् ।

---

[1] ख- ज्येष्ठी

[2] ख- .....समं

शाल्मल्यन्ध्रिफलत्रिकं कपिभवं बीजं समं चूर्णये[1]-

च्चूर्णांशा विजया सिता द्विगुणिता मध्वाज्ययोः पिण्डितम् ॥६.३११॥[2]

कर्षार्द्धा गुटिकावलेहमथवा सेव्यं सदा सर्वथा

पेयं क्षीरसिता तु वीर्यकरणं स्तम्भोऽप्ययं कामिनी ।

रामावश्यकरं सुखातिसुखदं प्रौढाङ्गनाद्रावकं

क्षीणे पुष्टिकरं क्षये क्षयहरं सर्वामयध्वंसनम् ॥ ६.३१२ ॥

कासश्वासमहातिसारशमनं मन्दाग्निसंदीपनं

धातोर्वृद्धिकरं रसायनवरं नास्त्यन्यदस्मात्परम् ।

अर्शांसि ग्रहणीप्रमेहनिचयश्लेष्मातिरक्तप्रणुन्

नित्यानन्दकरं विशेषविदुषां वाचां विलासोद्भवम् ॥ ६.३१३ ॥

अभ्यासेन निहन्ति मृत्युपलितं कामेश्वरो वत्सरात्

सर्वेषां हितकारको निगदितः श्रीवैद्यनाथेन यः ।

वृद्धानां मदनोदयोदयकरः प्रौढाङ्गनासङ्गमे

सिंहोऽयं समदृष्टिः प्रत्ययकरो भूपैः सदा सेव्यताम् ॥६.३१४ ॥[3]

---

[1] ख- बीजं मर्कटिशाल्मली त्रिफलकं चूर्णं समं कल्पयेत् ||६.३१०a||

[2] ख- कर्षार्धा गुटिकावलेहमथवा सेव्यं सदा सर्वथा ||६.३१०b ||

[3] ख- नास्ति |

अजीर्णकण्टकरसः

शुद्धं सूतं विषं गन्धं समचूर्णं विचूर्णयेत् ।

मरिचं सर्वतुल्यांशं कण्टकार्याः फलद्रवैः ॥ ६.३१५ ॥

मर्दयेद्भावयेत्सर्वानेकविंशतिवारकान् ।

वटीं गुञ्जात्रयां खादेत्सर्वाजीर्णप्रशान्तये ॥ ६.३१६ ॥

उदयभास्कररसः

गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत् ।

ऊषणं[1] पञ्चभागं स्यादमृतं च द्विभागकम् ॥ ६.३१७ ॥

श्लक्ष्णचूर्णीकृतं सर्वं रक्तिकैकप्रमाणतः ।

दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः ॥ ६.३१८ ॥

गलिते स्फुटिते चैव विषूच्यां मण्डले तथा ।

विचर्चिकादद्रुपामाकुष्ठाष्टकप्रशान्तये ॥ ६.३१९ ॥

रौद्ररसः

शुद्धं सूतं समं गन्धं मर्द्यं यामचतुष्टयम् ।

नागवल्लीरसैर्युक्तं मेघनादपुनर्नवैः ॥ ६.३२० ॥

गोमूत्रे पिप्पलीयुक्ते मर्द्यं रुद्ध्वा पुटेल्लघु ।

लिहेत्क्षौद्रे रसो रौद्रो गुञ्जामात्रोऽर्बुदं जयेत् ॥ ६.३२१ ॥

---

[1] Black pepper [MW.pg.223], भा.प्र.पू.मिश्र.२.४१ ||

नित्योदितरसः

मृतसूतार्कलोहाभ्रविषगन्धं समं समम् ।

सर्वतुल्यांशभल्लातफलमेकत्र चूर्णयेत् ॥ ६.३२२ ॥

द्रवैः सूरणकन्दोत्थैः खल्वे मर्द्यं दिनत्रयम् ।

माषमात्रं लिहेदाज्ये रसश्चार्शांसि नाशयेत् ॥ ६.३२३ ॥

रसो नित्योदितो नाम्ना गुदोद्भवकुलान्तकः[1] ।

हस्ते पादे मुखे नाभ्यां गुदवृषणयोस्तथा ॥ ६.३२४ ॥

शोथो हृत्पार्श्वशूलं च यस्यासाध्यार्शसां हितः ।

असाध्यस्यापि कर्तव्या चिकित्सा शङ्करोदिता ॥ ६.३२५ ॥

अर्शकुठाररसः

शुद्धसूतं पलैकं तु द्विपलं शुद्धगन्धकम् ।

मृतं ताम्रं मृतं लोहं प्रत्येकं तु पलत्रयम् ॥ ६.३२६ ॥

त्र्यूषणं लाङ्गली दन्ती पीलुकं चित्रकं तथा ।

प्रत्येकं द्विपलं योज्यं यवक्षारं च टङ्कणम् ॥ ६.३२७ ॥

उभौ पञ्चपलौ योज्यौ सैन्धवं पलपञ्चकम्[2] ।

द्वाविंशत्पलगोमूत्रं स्नुहीक्षीरं च तत्समम् ॥ ६.३२८ ॥

---

[1] ख- ....कुलान्तके

[2] ख- पञ्चकं तथा

मृद्वग्निना पचेत्सर्वं स्थाल्यां यावत्सुपिण्डितम् ।

माषद्वयं सदा खादेद्रसोऽप्यर्शःकुठारकः ॥ ६.३२९ ॥

विद्याधररसः

गन्धकं तालकं ताप्यं मृतं ताम्रं मनःशिला ।

शुद्धं सूतं च तुल्यांशं मर्दयेद्भावयेद्दिनम् ॥ ६.३३० ॥

पिप्पल्याश्च कषायेण वज्रीक्षीरेण भावयेत् ।

वल्लं च भक्षयेत्क्षौद्रैः प्लीहगुल्मादिकं जयेत् ॥ ६.३३१ ॥

रसो विद्याधरो नाम गोदुग्धं च पिबेदनु ।

वङ्गेश्वररसः

भस्मसूतं भस्मवङ्गं भागैकैकं प्रकल्पयेत् ॥ ६.३३२ ॥

गन्धकं मृतताम्रं च प्रत्येकं च चतुर्गुणम् ।

अर्कक्षीरैर्दिनं मर्द्यं सर्वं तद्गोलकीकृतम् ॥ ६.३३३ ॥

रुद्ध्वा तद्भूधरे पाच्यं पुटैकेन समुद्धरेत् ।

एवं वङ्गेश्वरो नाम्ना प्लीहगुल्मोदरं जयेत् ॥ ६.३३४ ॥

घृतैर्गुञ्जाद्वयं लिह्यान्निष्कां[1] श्वेतपुनर्नवाम् ।

गवां मूत्रैः पिबेच्चानु रजनी वा गवां जलैः ॥ ६.३३५ ॥

---

[1] क,ग-....निष्कं

उदरारिरसः

पारदं शिखितुत्थं[1] च जैपालं पिप्पलीसमम् ।

आरग्वधफलान्मज्जा वज्रीदुग्धेन मर्दयेत् ॥ ६.३३६ ॥

माषमात्रां वटीं खादेद्धरेत्स्त्रीणां जलोदरम् ।

चिञ्चाफलरसं चानु पथ्यं दध्योदनं हितम् ।

जलोदरहरं चैव तीव्रेण[2] रेचनेन तु ॥ ६.३३७ ॥

जलोदरारिरसः

पिप्पलीमरिचं ताम्रं काञ्चनीचूर्णसंयुतम् ॥ ६.३३८ ॥

स्नुहीक्षीरैर्दिनं मर्द्यं तुत्थं जैपालबीजकम् ।

निष्कं खादेद्विरेकं स्यात्सद्यो हन्ति जलोदरम् ॥ ६.३३९ ॥

रेचनानां च सर्वेषां दध्यन्नं स्तम्भनं हितम् ।

दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम् ॥ ६.३४० ॥

नाराचरसः

सूतटङ्कणतुल्यांशं मरिचं सूततुल्यकम् ।

गन्धकं पिप्पली शुण्ठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ ६.३४१ ॥

सर्वतुल्यं क्षिपेद्दन्तीबीजानि निस्तुषाणि च ।

---

[1] ख- शुक्तितुत्थं

[2] ख- कठिनेन ....छन्दोभङ्गः |

द्विगुञ्जं रेचने सिद्धं नाराचोऽयं महारसः ।

गुल्मप्लीहोदरं हन्ति पिबेत्तमुष्णवारिणा ॥ ६.३४२ ॥

इच्छाभेदिरसः

शुण्ठीमरिचसंयुक्तं रसगन्धकटङ्कणम् ।

जैपालस्त्रिगुणः प्रोक्तः सर्वमेकत्र चूर्णयेत् ॥ ६.३४३ ॥

इच्छाभेदी द्विगुञ्जः स्यात्सितया सह दापयेत् ।

पिबेच्च चुल्लिकान् यावत्तावद्वारान्विरेचयेत् ॥ ६.३४४ ॥

तक्रौदनं प्रदातव्यमिच्छाभेदी यथेच्छया ।

दोषाः कदाचित्कुप्यन्ति जिता लङ्घनपाचनैः ॥ ६.३४५ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां रसयोगनिरूपणं

नाम षष्ठोऽध्यायः ||

****

७.सप्तमोऽध्यायः

|| रसायनगुटिकाकथनम् ||

रसायनाधिकारः

प्रणम्य निर्भयं नाथं खेन्द्रदेवं जगत्पतिम् ।

दिगम्बरं त्रिनेत्रं च जरामृत्युविनाशनम् ॥ ७.१ ॥

अमृतं च विषं चैव शिवेनोक्तं रसायनम् ।

अमृतं विधिसंयुक्तं विधिहीनं तु तद्विषम् ॥ ७.२ ॥

रेचनान्त[1] इदं सेव्यं सर्वदोषापनुत्तये ।

मृताभ्रं भक्षयेदादौ मासमेकं विचक्षणः ॥ ७.३ ॥

पश्चात्तु योजयेद्देहे क्षेत्रीकरणमिच्छतः ।

यत्क्षेत्रीकरणे सूतस्त्वमृतोऽपि विषं भवेत् ॥ ७.४ ॥

फलसिद्धि[2]कुतस्तस्य सुबीजस्योषरे यथा ।

न क्षेत्रकरणाद्देवि किंचित्कुर्याद्रसायनम् ।

कर्तव्यं क्षेत्रकरणं सर्वस्मिंश्च रसायने ॥ ७.५ ॥

---

[1] रेचनान्ते इत्यत्र लोपः शाकल्यस्य ||पा.सू.८.३.१९ इत्यनेन लोपः|,ख- रेचनान्ते

[2] क- फलसिद्धिः

गन्धामृतरसायनम्[1]

भस्मसूतं द्विधा गन्धं क्षणं कन्याविमर्दितम् ।

रुद्ध्वा लघुपुटे पच्यादुद्धृत्य मधुसर्पिषा ॥ ७.६ ॥

निष्कं खादेज्जरामृत्युं हन्ति गन्धामृतो रसः ।

समूलं भृङ्गराजं तु छायाशुष्कं विचूर्णयेत् ॥ ७.७ ॥

तत्समं त्रिफलाचूर्णं सर्वतुल्या सिता भवेत् ।

पलैकं भक्षयेच्चानु तच्च मृत्युरुजापहम् ॥ ७.८ ॥

हेमसुन्दररसः

मृतसूतस्य पादांशं हेमभस्म प्रकल्पयेत् ॥ ७.९ ॥

क्षीराज्यं मधुना युक्तं माषैकं कांस्यपात्रके ।

लेहयेन्मासषट्कं तु जरामृत्युविनाशनम् ॥ ७.१० ॥

वाकुचीचूर्णकर्षैकं धात्रीरसपरिप्लुतम् ।

अनुपानं लिहेन्नित्यं स्याद्रसो हेमसुन्दरः ॥ ७.११ ॥

मृतसंजीवनी गुटिका

शुद्धसूतं वज्रभस्म सत्त्वमभ्रकरौप्ययोः[2] ।

कान्तलोहसमं हेम जम्बीरे मर्दयेद्दृढम् ॥ ७.१२ ॥

---

[1] क- नास्ति ।

[2] क- ....ताप्ययोः

सप्ताहं सर्वतुल्यांशं गोलं कृत्वा समुद्धरेत् ।

गोजिह्वावायसीवन्ध्यानिर्गुण्डीमधुसैन्धवैः ॥ ७.१३ ॥

लेपयेद्वज्रमूषान्ते गोलकं तत्र निक्षिपेत् ।

तत्कल्कैश्छादितं कृत्वा पक्षैकं भूधरे पचेत् ॥ ७.१४ ॥

यामं यामं समुद्धृत्य लिप्त्वा मूषां पुनः पुनः ।

रुद्ध्वाथ पूर्ववत्पाच्यमेनं पक्षात्समुद्धरेत् ॥ ७.१५ ॥

यवचिञ्ची[1]पलाशाख्यराजीकार्पासतण्डुलैः ।

एतैः प्रलेपयेन्मूषां गुटिकां तत्र निक्षिपेत् ॥ ७.१६ ॥

टङ्कणं श्वेतकाचं च दत्त्वा यामे दृढं दृढम् ।

खदिराङ्गारयोगेन द्रुतोऽयं जायते रसः ॥ ७.१७ ॥

मूषायां विड[2]योगेन समं हेम च जारयेत् ।

ततस्त्रियामकैर्मर्द्यं सगोमूत्रं दिनैकतः ॥ ७.१८ ॥

अन्धमूषागतो ध्मातो बद्धो भवति वज्रवत् ।

मृतसंजीवनी नाम गुटिका वक्रमध्यगा ॥ ७.१९ ॥

कर्षमात्रा जरां मृत्युं हन्ति सत्यं शिवोदितम् ।

---

[1] क- चिञ्चा..(the tamarind tree)[(MONIER-WILLIAMS, 1899)pg.395], Abrus precatorius [(MONIER-WILLIAMS, 1899)pg.395]

[2] क- बिड....इत्यपभ्रंशितः |

शस्त्रस्तम्भं च कुरुते ब्रह्मायुर्भवते नरः ॥ ७.२० ॥

वीर्यरोधिनी गुटिका

नागवल्लीदलद्रावैः सप्ताहं शुद्धसूतकम् ।

मर्दयेत्क्षालयेदम्लैश्चतुर्निष्कप्रमाणकम् ॥ ७.२१ ॥

विषकन्दगतं कृत्वा विषेणैव निरोधयेत् ।

ततः शूकरमांसस्य गर्भे कृत्वाथ सिञ्चयेत् ॥ ७.२२ ॥

संध्याकाले बलिं दत्त्वा कुक्कुटीवारुणीयुतम् ।

ततश्चुल्ल्यां लोहपात्रे तैले धत्तूरसंयुते ॥ ७.२३ ॥

क्षिप्त्वा त्रिंशत्पले पाच्यं तद्रसं मांसपिण्डकम् ।

संध्यामारभ्य मन्दाग्नौ यावत्सूर्योदयं पचेत् ॥ ७.२४ ॥

हठाज्जागरणं कुर्यादन्यथा तन्न सिद्धिभाक् ।

प्रातरुद्धृत्य गुटिकां क्षीरभाण्डे विनिक्षिपेत् ॥ ७.२५ ॥

तत्क्षीरं शुष्यति क्षिप्रमेतत्प्रत्ययकारकम् ।

रतिकाले मुखे धार्या गुटिका वीर्यरोधिनी ॥ ७.२६ ॥

क्षीरं पीत्वा रमेद्रामां कामाकुलकुलान्विताम् ।

स्वमुखाद्धारयेद्धस्ते तदा वीर्यं विमुञ्चति ॥ ७.२७ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां रसायनगुटिकाकथनं नाम सप्तमोऽध्यायः ||

****

८.अष्टमोऽध्यायः

|| नेत्राञ्जनकेशरञ्जनम् ||

अञ्जनविधिः

अथ सम्पक्वदोषस्य प्रोक्तमञ्जनमाचरेत् ।

हेमन्ते शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते ॥ ८.१ ॥

पूर्वाह्ने चापराह्ने च ग्रीष्मे शरदि चेष्यते ।

वर्षासु कुर्यादत्युष्णे वा वसन्ते सदैव हि ॥ ८.२ ॥

श्रान्ते प्ररुदिते भीते पीतमद्ये नवज्वरे ।

अजीर्णे वेगघाते च नाञ्जनं संप्रशस्यते[1] ॥ ८.३ ॥

वर्तिप्रमाणम् (१)

हरेणुमात्रां कुर्वीत वर्तिं तीक्ष्णाञ्जने भिषक् ।

प्रमाणं मध्यमे[2] सार्धं द्विगुणं च मृदौ भवेत् ॥ ८.४ ॥

नेत्रामयविनाशनाञ्जनम्

सूतकं गन्धकोपेतं[3] चाङ्गेरीरससंमूर्छितम् ।

---

[1] क- च अञ्जनं न प्रशस्यते ।

[2] क- मध्यमं

[3] क- गन्धकःपेतं......अपपाठः ।

अञ्जनं दृष्टिदं नृणां नेत्रामयविनाशनम् ॥ ८.५ ॥

नयनामृतानञ्जनम्

रसेन्द्रभुजगौ तुल्यौ ताभ्यां द्विगुणमञ्जनम् ।

ईषत्कर्पूरसंयुक्तमञ्जनं[1] नयनामृतम् ॥ ८.६ ॥

दृष्टिदाञ्जनम्

कृष्णसर्पवसा शङ्खः कतकं कट्फलमञ्जनम् ।

रस एष[2] मरीचेन अन्धानां दर्शनं परम् ॥ ८.७ ॥

शङ्खाद्यञ्जनम्

शङ्खस्य भागाश्चत्वारस्तदर्धेन[3] मनःशिला ।

मनःशिलार्धं मरिचं मरिचार्द्धेन पिप्पली ॥ ८.८ ॥

वारिणा तिमिरं हन्ति अर्बुदं हन्ति मस्तुना ।

चिपिटं मधुना हन्ति स्त्रीक्षीरेण च पुष्पकम् ॥ ८.९ ॥

अपामार्गशिखाद्यञ्जनम्

अपामार्गशिखां घृष्ट्वा मधुना सैन्धवेन च ।

ताम्रपात्रे कृता नेत्रे हन्ति पीडां सुविस्तरात्[4] ॥ ८.१० ॥

---

[1] क,ग- सूततुर्यांशं कर्पूरमञ्जनं

[2] क- एव

[3] ग- ....तर्द्धेन.....अपपाठः |

[4] ख- सुदुस्तराम्

दन्तादिवर्तिः

दन्तैर्दन्तिवराहोष्ट्रगोहयाजखरोद्भवैः ।

शङ्खमुक्ताम्भोधिफेनयुतैः सर्वैर्विचूर्णयेत् ।

हन्ति वर्तिः कृता श्लक्ष्णं शुक्राणां नाशिनी[1] परम् ॥ ८.११ ॥

तुत्थाञ्जनम्

तुत्थमाक्षिकसिन्धूत्थशिवाशङ्खमनःशिला ।

गैरिकोदकफेनं च मरिचं चेति चूर्णयेत् ॥ ८.१२ ॥

संयोज्य मधुना कुर्यादन्धानां सा रसक्रिया ।

वर्त्मरोगं[2] च तिमिरं काचशुक्रहरं परम् ॥ ८.१३ ॥

चन्द्रोदयावर्तिः[3]

शङ्खनाभिविभीतस्य मज्जा पथ्या मनःशिला ।

पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥ ८.१४ ॥

छागीक्षीरेण संपिष्ट्वा[4] वर्तिं कृत्वा यथोन्मिताम् ।

---

[1] ख- नासिनी ......अपपाठः ।

[2] ख- वर्ध्मरोगम् ।, internal rupture, hernia [(MONIER-WILLIAMS, 1899)pg.926], च.सि.१२.१६[(चरक, 2010)], वर्त्मरोगम् - an eyelid (as encircling the eye)[(MONIER-WILLIAMS, 1899)pg.९२५], ...नेत्रवर्त्मगताश्च ये । सु.सू.८.१८, वर्त्मगतरोगविज्ञानीय सु.उ.३.१

[3] ख- चन्द्रोदया वर्ती

[4] अपपाठः । संपिष्य इत्यपेक्ष्यते ।

हरेणुमात्रां संघृष्य जलैः कुर्यादथाञ्जनम् ॥ ८.१५ ॥

तिमिरं मांसवृद्धिं च काचं पटलमर्बुदम् ।

रात्र्यन्धं वार्षिकं पुष्पं वर्तिश्चन्द्रोदया[1] जयेत् ॥ ८.१६ ॥

प्रत्यञ्जनम्[2]

शुद्धे नागे द्रुते तुल्यं शुद्धसूतं विनिक्षिपेत् ।

कृष्णाञ्जनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् ॥ ८.१७ ॥

दशमांशेन कर्पूरमस्मिंश्चूर्णे प्रदापयेत् ।

एतत्प्रत्यञ्जनं नेत्रगदजिन्नयनामृतम् ॥ ८.१८ ॥

नेत्ररोगप्रणाशः

भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।

जाता रोगाः प्रणश्यन्ति न भवन्ति कदाचन ॥ ८.१९ ॥

त्रिफलायाः कषायेण प्रातर्नयनधावनात् ।

अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥ ८.२० ॥

केशरञ्जनम्

त्रिफलालौहचूर्णं[3] तु वारिणा पेषयेत्समम् ।

---

[1] क, ग- वर्तिचन्द्रोदया

[2] ख- प्रत्यञ्जनमाह |

[3] ग- त्रिफला लौहचूर्णं

द्वयोस्तुल्येन तैलेन पचेन्मृद्वग्निना क्षणम् ॥ ८.२१ ॥

तैलतुल्ये भृङ्गरसे तत्तैलं तु विपाचयेत् ।

स्निग्धभाण्डगतं भूमौ स्थित्वा[1] मासात्समुद्धरेत् ॥ ८.२२ ॥

सप्ताहं लेपयेद्वेष्ट्य कदल्याश्च दलैः शिरः ।

निर्वाते क्षीरभोजी स्यात् क्षालयेत्[2] त्रिफलाजलैः ॥ ८.२३ ॥

नित्यमेव प्रकर्तव्यं सप्ताहं रञ्जनं भवेत् ।

यावज्जीवं न सन्देहः कचाः स्युर्भ्रमरोपमाः ॥ ८.२४ ॥

काकमाची यवा जाती समं कृष्णतिलं ततः ।

तत्तैलं ग्राहयेद्यन्त्रे तेन स्यात्केशरञ्जनम् ॥ ८.२५ ॥

पलितनाशनम् (१)

लोहमलामलकल्कैः[3] सजपाकुसुमै[4]र्नरः सदा स्नायी ।

पलितानीह निहन्याद्गङ्गास्नायीव नरकौघम्[5] ॥ ८.२६ ॥

पलितनाशनम् (२)

काश्मर्या मूलमादौ सहचरकुसुमं केतकीनां च मूलं

[1] ख- स्थितम्

[2] क,ग- छालयेत्

[3] ग- ....कल्कः

[4] ग- सजपा कुसुमैः....अपपाठः |

[5] ग- नरकौधम् ......अपपाठः |

लौहं चूर्णं सभृङ्गं त्रिफलजलयुतं तैलमेभिर्विपक्वम् ।

कृत्वा वै लोहभाण्डे क्षितितलनिहितं मासमेकं निधाय

केशाः काशप्रकाशा भ्रमरकुलनिभा लेपनादेव कृष्णाः ॥ ८.२७ ॥

शुक्लीकरणम्

वज्रीक्षीरेण सप्ताहं सुश्वेतान् भावयेत्तिलान् ।

तैलेन लिप्ताः केशाः स्युः शुक्ला वै नात्र संशयः ॥ ८.२८ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां नेत्राञ्जनकेशरञ्जनं

नामाष्टमोऽध्यायः ||

****

९.नवमोऽध्यायः

|| वीर्यस्तम्भनबालतन्त्रम् ||

वीर्यस्तम्भनम् (१)

कर्पूरं टङ्कणं सूतं तुल्यं मुनिरसं मधु ।

मर्दयित्वा लिपेल्लिङ्गं स्थित्वा यामं तथैव च ॥ ९.१ ॥

ततः प्रक्षालयेल्लिङ्गं रमेद्रामां यथोचिताम् ।

वीर्यस्तम्भकरं पुंसां सम्यङ्नागार्जुनोदितम् ॥ ९.२ ॥

वीर्यस्तम्भनम् (२)

कृकलासस्य[1] पुच्छाग्रं मुद्रिका प्रोततन्तुभिः ।

वेष्ट्या कनिष्ठिका धार्या नरो वीर्यं न मुञ्चति ॥ ९.३ ॥

वीर्यस्तम्भनम् (३)

मधुना पद्मबीजानि पिष्ट्वा नाभिं प्रलेपयेत् ।

यावत्तिष्ठत्यसौ लेपस्तावद्वीर्यं न मुञ्चति ॥ ९.४ ॥

वीर्यस्तम्भनम् (४)

चटकाण्डं तु संग्राह्य नवनीतेन पेषयेत् ।

तेन प्रलेपयेत्पादौ शुक्रस्तम्भः प्रजायते ।

---

[1] सरटः |अमर.२.५.१२||, a lizard, chameleon [(MONIER-WILLIAMS, 1899)pg.३०४]

यावन्न स्पृशते भूमिं तावद्वीर्यं न मुञ्चति ॥ ९.५ ॥

वीर्यस्तम्भनम् (५)

वनक्रोडस्य[1] दंष्ट्राग्रं दक्षिणं च समाहरेत् ।

कट्यामुपरि यद्बद्ध्वा शुक्रस्तम्भः प्रजायते ॥ ९.६ ॥

वीर्यस्तम्भनम् (६)

डुण्डुभो नामतः सर्पः कृष्णवर्णस्तमाहरेत् ॥ ९.७ ॥

तस्यास्थि धारयेत्कट्यां नरो वीर्यं न मुञ्चति ।

विमुञ्चति विमुक्तेन सिद्धयोग उदाहृतः ॥ ९.८ ॥

वीर्यस्तम्भनम् (७)

रक्तापामार्गमूलं तु सोमवाराभिमन्त्रितम् ।

भौमे प्रातः समुद्धृत्य कट्यां बद्ध्वा न वीर्यमुक् ॥ ९.९ ॥

वीर्यस्तम्भनम् (८)

खसपलं शुण्ठीक्वाथः[2] षोडशांशेन गुडेन निशि पीतः ।

कुरुते रतौ न पुंसो रेतः पतनं विनाम्लेन ॥ ९.१० ॥

वीर्यस्तम्भनम् (९)

सूरणं तुलसीमूलं ताम्बूलेन तु भक्षयेत् ।

---

[1] दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार || अमर.२.५.२.२.४ || a hog [(MONIER-WILLIAMS, 1899)pg.३२३]

[2] ख- खसपलशुण्ठीक्वाथः | ग- शुण्ठी क्वाथः ....अपपाठः |

न मुञ्चति नरो वीर्यमेकैकेन न संशयः ॥ ९.११ ॥

स्थूलीकरणम्

वराहवसया लिङ्गं मधुना सह लेपयेत् ।

स्थूलं दृढं च दीर्घं च पुंसो लिङ्गं प्रजायते ॥ ९.१२ ॥

ध्वस्तीकरणम्

क्षौद्रेण च समं घृष्टं[1] पुण्डरीकस्य केशरम् ।

ध्वस्तं कुर्यात्ततो मेढ्रं रत्यन्यत्राप्यसंशयः ॥ ९.१३ ॥

षण्ढत्वकरणम्

अनुराधासुनक्षत्रे लाङ्गलीमूलिका ध्रुवम् ।

निखाता मैथुनस्थाने पुंसत्त्वखण्डकारिणी ॥ ९.१४ ॥

निशा षट्तिन्दुचूर्णेन भावितेनाजवारिणा ।

पानाशनप्रयुक्तेन[2] षण्ढत्वं जायते नृणाम् ॥ ९.१५ ॥

षण्ढत्वनाशनम्

तिलगोक्षुरयोश्चूर्णं छागीदुग्धेन पाचितम् ।

शीतलं मधुना युक्तं भुक्तं षण्ढत्वनाशनम् ॥ ९.१६ ॥

ऊर्णनाभिस्तु यो जीवो मधुना सह लेपयेत् ।

---

[1] क- पृष्टं

[2] ग- पानाशनं प्रयुक्तेन

तेन लेपयतो नाभिं बद्धषण्ढ्यं विमुच्यते ॥ ९.१७ ॥

स्त्रीद्रावणम्

एक एव महाद्रावी मालतीसम्भवो रसः ।

किं पुनर्यदि युज्यते मधुकर्पूरपारदैः ॥ ९.१८ ॥

आर्द्रकं गन्धकं चैव राजिकं चाथ टङ्कणम् ।

सम्पिष्टा सममात्राणि क्षेपयेन्निम्बुजे जले ॥ ९.१९ ॥

स्थापयेद्घटिकां तिस्रो हस्ते वा धारयेत्ततः ।

यावन्त्यो ललनाः पञ्च आजिघ्रन्ति द्रवन्ति वै ॥ ९.२० ॥

चूर्णिते मधुसंयुक्ते महारिष्टफलच्छदैः ।

लिङ्गलेपेन सुरते द्रवो भवति योषिताम् ॥ ९.२१ ॥

स्त्रीवशीकरणम्

मधुसैन्धवसंयुक्तं पारावतमलान्वितम् ।

एतल्लिप्तेन्द्रियो रामां दासीवत्कुरुते रतौ ॥ ९.२२ ॥

कपीन्द्रियं शशी सूतं कुङ्कुमं कनकं मधु ।

एतल्लिप्तेन्द्रियो रामां दासीवत्कुरुते रतौ ॥ ९.२३ ॥

स्त्रीवशीकरणयन्त्रम्

वृत्तमध्यस्थितं नाम तद्बाह्ये ह्रीं चतुष्टयम् ।

तद्बहिः क्लीं चतुष्कं च लिखित्वा शिलयाखिलम् ॥ ९.२४ ॥

शुभनक्षत्रसंयोगे स्थापितं मधुनि ध्रुवम् ।

स्त्रियमाकर्षति क्षिप्रं यन्त्रमेतन्न संशयः ॥ ९.२५ ॥

स्त्रीवशीकरणम् (१)

चन्दनं तगरं कुष्ठं प्रियङ्गुं नागकेशरम् ।

कृष्णां तिन्तिडिकं चैव समभागानि कारयेत् ॥ ९.२६ ॥

दापयेच्चैव सप्ताहमात्मपञ्चमलेन तु ।

खाने पाने प्रदातव्यं स्त्रियं वा पुरुषं तथा ॥ ९.२७ ॥

ॐ नमो भगवते उमामहेश्वराय

ॐ नमो मोहिनीये मिलि मिलि सुभगे स्वाहा |

अनेन सप्ताभिमन्त्रितं कृत्वा नियोजयेत् वशीकरणं भवति ||

स्त्रीवशीकरणम् (२)

शंखपुष्पी मधुपुष्पी तथा कुञ्चिकिपत्रिका ।

श्वेतगिरिसमायुक्ता समभागानि कारयेत् ॥ ९.२८ ॥

सप्ताहं दापयेद्युक्ता ह्यात्मपञ्चमलेन च ।

खाने पाने प्रदातव्यं वशीकरणमुत्तमम् ॥ ९.२९ ॥

पूर्वोक्तमन्त्रेण सप्तभिमन्त्रितं[1] कृत्वा दापयेत्[2] ।

---

[1] ग- सप्ताभिः कृत्वा | अत्र सप्ताभिः इत्यपपाठः |

[2] ग- मन्त्रितदापयेत्

भगसङ्कोचनम्

प्रक्षालने भगे नित्यं कृते चामलवल्कलैः ।

वृद्धापि कामिनी कामं बालेव कुरुते रतिम् ॥ ९.३० ॥[1]

लोमशातनम् (१)

हरितालचूर्णकलिका लेपात्तेनैव वारिणा सद्यः ।

निपतन्ति केशनिचयाः कौतुकमिदमद्भुतं कुरुते ॥ ९.३१ ॥[2]

लोमशातनम् (२)

पलाशचिञ्चातिलमाषशङ्खं दहेदपामार्गसपिप्पलोऽपि ।

मनःशिलातालकचूर्णलेपात्करोति निर्लोमशिरः क्षणेन[3] ॥९.३२ ॥[4]

विद्वेषकरणम् (१)

गर्दभस्य रजो गृह्य लुलितं गात्रसम्भवम् ।

मृतकस्य तथा भस्म नारीरजःसमन्वितम् ॥ ९.३३ ॥

एकीकृत्य क्षिपेद्रात्रौ शय्यायामासनेऽपि वा ।

नूनं सञ्जायते द्वेषः कथितो मालतीमते ॥ ९.३४ ॥[5]

---

[1] क, ग- ९.३४

[2] क, ग- ९.३७

[3] क- क्षणात्

[4] क, ग- ९.३८ ख- ९.३४

[5] क, ग- ९.३०-३१; ख- ९.३५-३८

विद्वेषकरणम् (२)

अन्यद्योगवरं वक्ष्ये विद्वेषकरणं परम्   ।

युध्यमानावुभौ श्वानौ परस्परविरोधिनौ   ॥ ९.३२ ॥

तयोर्धूलिं समादाय हन्यते योषितां रतिः   ।

सत्यं भवति विद्वेषं नात्र कार्या विचारणा   ॥ ९.३३ ॥[1]

स्तनदृढीकरणम् (१)

सपद्मबीजं सितया भक्षितं पद्मवारिणा   ।

दृढं स्त्रीणां स्तनद्वन्द्वं मासेन कुरुते भृशम्   ॥ ९.३५ ॥

स्तनदृढीकरणम् (२)

मुण्डीचूर्णकषायेण युतं तैलं विपाचितम्   ।

पतितं यौवनं यस्यास्तस्याः स्तनोन्नतिर्भवेत् ॥ ९.३६ ॥

वन्ध्याकरणम् (१)

तण्डुलीयकमूलानि पिष्ट्वा तण्डुलवारिणा   ।

ऋत्वन्ते त्र्यहपीतानि वन्ध्यां कुर्वन्ति योषितम्   ॥ ९.३९ ॥

वन्ध्याकरणम् (२)

काञ्जिकेन जपापुष्पं पिष्ट्वा पिबति याङ्गना   ।

ऋतौ त्र्यहं निपीतानि वन्ध्यां कुर्वन्ति योषितम्   ॥ ९.४० ॥

---

[1] क, ग- ९.३२-३३; ख- ९.३९-४०

वन्ध्याकरणम् (३)

धूपिते योनिरन्ध्रे तु निम्बकाष्ठेन युक्तितः ।

ऋत्वन्ते रमते सा स्त्री गर्भदुःखविवर्जिता ॥ ९.४१ ॥[1]

वन्ध्याकरणम् (४)

धत्तूरं मल्लिकापुष्पं गृहीत्वा कटिसंस्थितम् ।

गर्भं[2] निवारयत्येव रण्डावेश्यादियोषिताम् ॥ ९.४२ ॥[3]

वन्ध्यात्वनिवारणम् (१)

नागकेशरपुष्पाणां चूर्णं गोसर्पिषा सह ।

सेवनाल्लभते पुत्रमृतौ दुग्धान्नभोजिनी ॥ ९.४३ ॥

वन्ध्यात्वनिवारणम् (२)

बीजानि मातुलुङ्गस्य दुग्धस्विन्ना ससर्पिषा ।

सगर्भामिति कुर्वन्ति पानाद्वन्ध्यामपि स्त्रियम् ॥ ९.४४ ॥

वन्ध्यात्वनिवारणम् (३)

मातुलुङ्गस्य बीजानि कुमार्या सह पेषयेत् ।

क्षीरेण सह दातव्यं गर्भमाप्नोत्यसंशयम् ॥ ९.४५ ॥

---

[1] ख- ९.४६

[2] ग- गर्मं ......अपपाठः ।

[3] ख- ९.४५

वन्ध्यात्वनिवारणम् (४)

पिप्पली शृङ्गवेरं च मरिचं केशरं तथा ।

घृतेन सह पातव्यं वन्ध्यागर्भप्रदं परम् ॥ ९.४६ ॥

पुष्योद्धृतं लक्ष्मणाया मूलं पिष्टं च कन्यका ।

ऋत्वन्ते घृतदुग्धाभ्यां पीत्वा गर्भमवाप्नुयात्[1] ॥ ९.४७ ॥

वन्ध्यात्वनिवारणम् (५)

यासां पुष्पागमो नास्ति ऋतुकाले च योषिताम् ।

तासां कुर्याच्चिकित्सेयं पुनः पुष्पागमो भवेत् ॥ ९.४८ ॥

पिप्पलीं च यवक्षारं विडङ्गं[2] मन्मथफलम्[3] ।

तिक्तं[4] तु तुम्बिनीबीजं गुटिकां कारयेद्भिषक् ॥ ९.४९ ॥

मुण्डी च क्षीरसंयुक्ता योनिद्वारेऽङ्गना शुभा ।

त्रिपञ्चसप्तरात्रेण पुष्पं भवति नान्यथा ॥ ९.५० ॥[5]

---

[1] ख- प्राप्नोति संयुतम् ।

[2] ख- विडङ्गा । विडङ्ग m. and f(आ). Embelia Ribes [(MONIER-WILLIAMS, 1899)pg.९६२], तण्डुलश्च कृमिघ्नश्च विडङ्गं पुन्नपुंसकम्॥ अमर. 2.4.106. 2.3 ॥ विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु । शूलाध्मानोदर-श्लेष्मकृमिवातविबन्धनुत् ॥ भा. प्र. पू. मिश्र. २.१०१॥

[3] ख- मन्मथं फलं ।

[4] ख- शुभ्रं ।

[5] ग- ९.६९-७१, ख-९.७२-७४ ॥

वन्ध्यात्वनिवारणम् (६)

अन्यद्योगवरं वक्ष्ये येन सा सफला भवेत् ।

उशीरमधुयष्टी च लोध्रमिन्द्रयवानपि ॥ ९.५१ ॥

घृतं सर्जरसं चैव माक्षिकं त्रायमाणकम् ।

शोभाञ्जनक[1]मूलानि समभागानि कारयेत् ॥ ९.५२ ॥

पेषयित्वा ततो द्रव्यमजाक्षीरेण पाचयेत् ।

सप्तरात्रं पिबेन्नारी यावत्तिष्ठति शोणितम् ॥ ९.५३ ॥

ततो योनौ विशुद्धायां पश्चाद्दद्यान्महौषधम् ।

कुमारीक्षीरसंयुक्तं नस्ये पाने प्रदापयेत् ॥ ९.५४ ॥

तेन सा लभते पुत्रं सत्यं चैव सुरार्चितम्[2] ।

वन्ध्यात्वनिवारणम् (७)

लशुनं क्षीरसंयुक्तं नस्ये पाने प्रदापयेत् ॥ ९.५५ ॥

अश्वगन्धाकृतं चूर्णमजाक्षीरेण दापयेत् ।

---

[1] ख- सौभाञ्जनक.....अपपाठः | सौभाञ्जन m. = (or w.r. for) शोभाञ्जन, Moringa Pterygosperma [(MONIER-WILLIAMS, 1899),pg.१२५३], शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः | अमर. 2.4.31.1.1 ||, शोभाञ्जनकैरण्डार्कवृश्चीरपुनर्नवायवतिलकुलत्थमाषबदराणीति दशेमानि स्वेदोपगानि भवन्ति ||च. सू. ४.१३

[2] ग- सुराचिर्तम् ....अपपाठः |

यवक्षारं विडङ्गं[1] च गुडूची च हरेणुका ॥ ९.५६ ॥

सर्वाणि समभागानि कृत्वा च वरचूर्णितान् ।

एतत्पीत्वा लभेत्[2] पुत्रं सा नारी नात्र संशयः ॥ ९.५७ ॥

वन्ध्यात्वनिवारणम् (८)

हिङ्गुं च शतवीर्या[3] च दाडिमं सैन्धवं तथा ।

त्रिकटुः शतपुष्पा च नागपुष्पं शतावरी ॥ ९.५८ ॥

मधुकं सुमना चैव कार्षकाणि प्रदापयेत् ।

क्षीरेण सह दातव्या नार्याश्च पुरुषस्य च ॥ ९.५९ ॥

दिनत्रयं तु भुञ्जीत शालितण्डुल[4]दुग्धकम्[5] ।

भुक्तं तु लभते गर्भं नारीणां नात्र संशयः ॥ ९.६० ॥

वन्ध्यात्वनिवारणम् (९)

अर्कमूलं प्रियङ्गुं च कुसुम्भं नागकेशरम् ।

---

[1] ग- विडङ्गश्च

[2] पदव्यत्ययो | लभेत इत्यपेक्ष्यते |

[3] ख- शतवीरा ....अपपाठः | f. white. flowering Dūrvā grass, Asparagus Racemosus[MW.pg.१०५०],ऐन्द्रीब्राह्मीशतवीर्यासहस्रवीर्याऽमोघाऽव्यथा-शिवाऽरिष्टावाट्यपुष्पीविष्वक्सेनकान्ता इति दशेमानि प्रजास्थापनानि भवन्ति ||च.सू.४.१८ ||

[4] ख- तन्दुलः

[5] ख- .....दुग्धया ....अपपाठः दुग्धपदस्य नपुंसकत्वात् | ग-शालितण्डुलदुग्ध कम् ....इत्यप्यपपाठः |

बला चातिबला छागीक्षीरं पीतं दिनत्रयम् ॥ ९.६१ ॥

विशोधयन्ति योनिं च ततो दद्यान्महौषधम् ।

उत्पलं तगरं कुष्ठं यष्टीमधु सचन्दनम् ॥ ९.६२ ॥

अजाक्षीरेण पिष्टानि दापयेत्पञ्चवासरम् ।

लक्ष्मणा गोपयोयुक्ता तस्यै पाने प्रदापयेत् ॥ ९.६३ ॥

तेन सा लभते पुत्रं लक्षणाढ्यं सुपण्डितम् ।

वन्ध्यात्वनिवारणम् (१०)

गते रक्ते[1] भगे शुद्धे सक्षीरा लक्ष्मणा तथा ॥ ९.६४ ॥

नस्ये पाने प्रदातव्या लभते सुतमङ्गना ।

श्वेतार्कक्षुद्रणीश्वेता श्वेता च गिरिकर्णिका ॥ ९.६५ ॥

लक्ष्मणा वन्ध्यकर्कोटी देयं गोक्षीरसंयुतम् ।

नस्ये पाने कृते गर्भं लभते रतिसंगमात् ॥ ९.६६ ॥

गर्भस्तम्भनम् (१)

पतन्तं स्तम्भयेद्गर्भं कुलालकरमृत्तिका ।

मधुच्छागीपयः पीत्वा किं वा श्वेताद्रिकर्णिका ॥ ९.६७ ॥

ललना शर्करा पाठा कन्दश्च मधुनान्वितः ।

---

[1] ख- गतरक्ते

भक्षितो वारयत्येव पतन्तं गर्भसंस्थितम्[1] ॥ ९.६८ ॥

गर्भस्तम्भनम् (२)

समभागं सितायुक्तं शालितण्डुल[2]चूर्णकम् ।

उदुम्बरशिफाक्वाथे पीतं गर्भं सुरक्षति ॥ ९.६९ ॥

सुखप्रसवोपायः (१)

मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।

घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥ ९.७० ॥

सुखप्रसवोपायः (२)

तुषाम्बुपरिघृष्टेन कन्देन परिलेपयेत् ।

लाङ्गल्याश्चरणौ सूतिं क्षिप्रमाप्नोति गर्भिणी ॥ ९.७१ ॥

बालतन्त्रम्

बालतन्त्रं प्रवक्ष्यामि समासाद्रावणोदितम् ।

पूजाद्रव्यं दिशो भागं मन्त्रं तद्ग्राह्यलक्षणम् ॥ ९.७२ ॥

मन्दा योगिनी

प्रथमे दिवसे मासे वर्षे गृह्णाति बालकम् ।

मन्दानाम्नी समाख्याता योगिणी तस्य लक्षणम् ॥ ९.७३ ॥

---

[1] ख- गर्भमञ्जसा

[2] ख- तन्दुल....

सुनन्दा योगिनी

द्वितीये दिवसे मासे वर्षे गृह्णाति बालकम् ।

सुनन्दा योगिनी नाम प्रथमं जायते ज्वरः ॥ ९.७४ ॥

सङ्कोचो हस्तपादानामक्षिरोगोऽतिच्छर्दनम् ।

सभयत्वं कृशत्वं च तद्ग्रस्त[1] इति लक्षणम् ॥ ९.७५ ॥

पूतना योगिनी

तृतीये दिवसे मासे वर्षे गृह्णाति बालकम् ।

पूतना योगिनी नाम गात्रभङ्गो ज्वरोऽरुचिः[2] ॥ ९.७६ ॥

प्रलापं कन्धराशोथच्छर्दिरित्यादिलक्षणम् ।

अपराह्णे च वारुण्यां पञ्चरात्रं बलिं क्षिपेत् ॥ ९.७७ ॥

बिडाली योगिनी

चतुर्थे दिवसे मासे वर्षे गृह्णाति बालकम् ।

बिडाली नाम तद्ग्रस्ते चक्षुःशूलं ज्वरोऽरुचिः[3] ॥ ९.७८ ॥

गात्रमाटेनमित्यादि[4] विवर्णेन बलिं क्षिपेत् ।

---

[1] ख- तद्ग्रस्ते

[2] ख- रुचिः

[3] ख- रुचिः

[4] ग- गात्र माटेन मित्यादि ......अपपाठः ।

नर्तकी योगिनी

पञ्चमे दिवसे मासे वर्षे गृह्णाति बालकम् ॥ ९.७९ ॥

नर्तकीति समाख्याता योगिनी तस्य लक्षणम् ।

शकुनी योगिनी

अथ षष्ठदिने मासे वर्षे गृह्णाति बालकम् ॥ ९.८० ॥

योगिनी शकुनी नाम कासश्वासोऽरुचिर्ज्वरः ।

हस्तपादादिसङ्कोचश्चक्षुःपीडेति लक्षणम् ॥ ९.८१ ॥

पञ्चरात्रं बलिं तस्यै वारुण्यां दिशि निक्षिपेत् ।

शुष्काशिवा योगिनी

सप्तमे दिवसे मासे वर्षे शुष्काशिवा शिशुम् ॥ ९.८२ ॥

गृह्णाति रोदनं कम्पो ज्वरशोषादिलक्षणम् ।

पश्चिमायां दिशि पञ्च बलौ दत्ते शिशुः सुखी ॥ ९.८३ ॥

जृम्भका योगिनी

अष्टमे दिवसे मासे वर्षे गृह्णाति जृम्भका ।

तया गृहीतमात्रस्य प्रथमं जायते ज्वरः ॥ ९.८४ ॥

शिरःपीडाक्षिरोगश्च चक्षुरुत्पाटचेष्टितम् ।

दक्षिणां दिशिमाश्रित्य बलिं तस्यै प्रदापयेत् ॥ ९.८५ ॥

अचिन्ता योगिनी

नवमे दिवसे मासे वर्षे गृह्णाति बालकम् ।

अचिन्ता योगिनी नाम गात्रभङ्गः शिरोऽक्षिरुक् ॥ ९.८६ ॥

छर्दिः प्रलाप इत्यादि तद्गृहीतस्य लक्षणम् ।

उत्तरां दिशिमाश्रित्य बलिं तस्यै प्रदापयेत् ॥ ९.८७ ॥

कापालिका योगिनी

दशमे दिवसे मासे वर्षे गृह्णाति बालकम् ।

नाम्ना कापालिका ख्याता योगिनी तस्य लक्षणम् ॥ ९.८८ ॥

रोदनं कम्पनं छर्दिज्वरो दुर्बलताक्षिरुक् ।

पूर्वां दिशं समाश्रित्य पञ्चरात्रं बलिं क्षिपेत् ॥ ९.८९ ॥

लिप्सिता योगिनी

एकादशे दिने मासे वर्षे गृह्णाति लिप्सिता ।

गात्रकम्पो ज्वरस्तीव्रस्तद्गृहीतस्य लक्षणम् ॥ ९.९० ॥

पीतली योगिनी

भानुसंख्ये दिने मासे वर्षे गृह्णाति बालकम् ।

पीतली योगिनी नाम रोदनं वेदना ज्वरः ॥ ९.९१ ॥

निद्रा क्षीणस्वरः पीतो वमनाहारशून्यता ।

उत्तरां दिशमाश्रित्य[1] सप्तरात्रं बलिं क्षिपेत् ॥ ९.९२ ॥

---

[1] क,ग- दिशिमाश्रित्य ....अपपाठः |

भद्रकाली योगिनी

कामसंख्ये दिने मासे वर्षे गृह्णाति बालकम् ।

भद्रकाली ज्वरो नाम वामहस्तस्य कम्पम् ॥ ९.९३ ॥

वेदनारुचिनिःश्वासाः कायः पीतो विचेष्टितम् ।

पूर्वां दिशं[1] समाश्रित्य बलिं तस्यै प्रदापयेत् ॥ ९.९४ ॥

तारा योगिनी

पुरन्दरदिने मासे वर्षे गृह्णाति बालकम् ।

तारा हि योगिनी नाम ज्वरः शोषोऽरुचिर्भृशम् ॥ ९.९५ ॥

चक्षुःपीडेङ्गितं तस्यै पश्चिमे बलिमाहरेत् ।

शर्वरी योगिनी

पक्षे च दिवसे मासे वर्षे गृह्णाति बालकम् ॥ ९.९६ ॥

योगिनी शर्वरी नाम श्वासः कासोऽरुचिर्ज्वरः ।

तद्ग्रस्ते चिह्नमित्यादि दक्षिणस्यां बलिं क्षिपेत् ॥ ९.९७ ॥

कुमारी योगिनी

विकारदिवसे मासे वर्षे गृह्णाति योगिनी ।

कुमारी नयनोद्वेगो[2] ज्वरशोषादिचेष्टितम् ॥ ९.९८ ॥

---

[1] क, ग- दिशः ....अपपाठः ।

[2] ख- नयनोद्वेगः

नैर्ऋतीं दिशमाश्रित्य[1] सप्तरात्रं बलिं क्षिपेत् ।

पूजाविधिबलिदानम्

बालं च स्नपयेत्पश्चाच्छान्तितोयेन मन्त्रवित् ॥ ९.९९ ॥

नदीतीरद्वयाकृष्टमृदा देवीस्वरूपकम् ।

कृत्वा पूजा च कर्तव्या भूपपुष्पाक्षतादिभिः ॥ ९.१०० ॥

वटका लड्डुकापूपा अग्रभक्तं गुडं दधि ।

चातुर्वर्ण्यपताकाश्च प्रदीप्ताः पुष्पचन्दनम् ॥ ९.१०१ ॥

पूजयेत्सर्वरोगाणामपराह्ने यथाबलि[2] ।

सर्वत्र नामभेदेन बलिदानं प्रजायते ॥ ९.१०२ ॥

ॐ नमो भगवति...... देवि बालं मुञ्च बलिं गृहाण स्वाहा |

सर्वत्र बलिनिवेदने मन्त्रोऽयम् ||

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां वीर्यस्तम्भनबालतन्त्रं नाम नवमोऽध्यायः ||

****

[1] क,ग- दिशिमाश्रित्य..........अपपाठः |

[2] ख- यथा बलिः |, ग- यथा बलि

१०.दशमोऽध्यायः

|| कालविज्ञानछायापुरुषविज्ञानम् ||

कालविज्ञानम्

अथ कालस्य विज्ञानं प्रवक्ष्यामि यथासुखम् ।

जीवितं मरणं योगी यतो जानाति निश्चयात् ॥ १०.१ ॥

कालग्रहस्य यस्येदं दंष्ट्रासम्पुटके जगत् ।

अद्यैव वा प्रभाते वा सोऽवश्यं भक्षयिष्यति[1] ॥ १०.२ ॥

रसं रसायनं योगं कालं ज्ञात्वा समाचरेत् ।

यस्माज्ज्ञानं विना व्यर्थं तत्तस्मात्प्रोच्यतेऽधुना ॥ १०.३ ॥

दूताज्ज्ञानम्

दूतो रक्तकषायकृष्णवसनो दन्ती जरामर्दित-

स्तैला[2]भ्यक्तशरीरकायुधकरो दीनाश्रुपूर्णाननः ।

भस्माङ्गारकपालपांशुमुशलः सूर्यास्तसूर्योदये

यः सूर्यस्वरसंस्थितो गदवतां कालाय स स्यादसौ ॥ १०.४ ॥

---

[1] ग- भविष्यति.....छन्दोभङ्गः |

[2] ग- ...स्तैला... अपपाठः |

अरिष्टलक्षणम् (१)

अकस्माच्चित्तविकृतिरकस्मात्पुरुषोत्तमः ।

अकस्मादिन्द्रियोत्पत्तिः सन्निपातस्य लक्षणम् ॥ १०.५ ॥

शरीरं शीतलं यस्य प्रकृतेर्विकृति[1]र्भवेत् ।

तत्रारिष्टं समासेन व्याप्तं तत्र निबोध मे ॥ १०.६ ॥

दुष्टशब्देन रमते साधुशब्देन कुप्यति ।

यश्चाकस्मान्न शृणुते तं गतायुषमादिशेत् ॥ १०.७ ॥

अरिष्टलक्षणम् (२)

यो वा गन्धं न गृह्णाति दीपे शान्ते च मानवः ।

दिवाज्योतींषि[2] यश्चापि ज्वलितानि च पश्यति ॥ १०.८ ॥

चन्द्रं सूर्यप्रभं पश्येत्सूर्यं वा चन्द्रवर्चसम् ।

तडिद्वातोषितान्मेघान्निर्मले गगने चरान् ॥ १०.९ ॥

विमानयानप्रासादैर्यश्च सङ्कुलमम्बरम् ।

यश्च नीलं[3] मूर्तिमन्तमन्तरिक्षं च पश्यति ॥ १०.१० ॥

यस्तूष्णमिव गृह्णाति शीतमुष्णं च शीतवत् ।

---

[1] ख- विकृतेः.....

[2] ख- दिवा ज्योतींषि ।

[3] ख- यश्चानीलं

सञ्जातः संशयो यस्य तं वदन्ति गतायुषम् ॥ १०.११ ॥

अरिष्टलक्षणम् (३)

विपरीतेन गृह्णाति भावानन्यांश्च यो नरः ।

धूमनीहारवासोभिरावृतामिव मेदिनीम् ॥ १०.१२ ॥

प्रदीप्तमिव लोकं च योऽवलुप्तमिवाम्भसा ।

भूमिमष्टादशाकारां लेखाभिर्यस्तु पश्यति ॥ १०.१३ ॥

ज्योत्स्नादर्शे हि तोयेषु छायां यश्च न पश्यति ।

पश्यत्येकाङ्गहीनां च वैकृतं चापि पश्यति ॥ १०.१४ ॥

श्वकाककङ्कगृध्राणां प्रयातं यक्षरक्षसाम्[1] ।

पिशाचोरगनागानां विकृतामपि यो नरः ॥ १०.१५ ॥

ह्रीश्रियौ यस्य नश्येतां तेज ओजः स्मृतिस्तथा ।

अकस्माज्जृम्भते यश्च स परासुरसंशयम् ॥ १०.१६ ॥

यस्याधरोष्ठः पतति स्थितश्चोर्ध्वं तथोत्तरम् ।

पाशशङ्का भवेद्यस्य दुर्लभं तस्य जीवितम् ॥ १०.१७ ॥

अरिष्टलक्षणम् (४)

कुटिला स्फुटिता वापि सुप्ता यस्य च नासिका ।

---

[1] ग- यक्षराक्षसाम्.....षष्ठीबहुवचनापेक्षितत्वादयमपपाठः |

अवस्फूर्यति मग्ना वा स परासुरसंशयम् ॥ १०.१८ ॥

स्वरूपं परनेत्रेषु पुत्तिकां यो न पश्यति ।

यदा हि पटुदृष्टिश्च तदा मृत्युरदूरतः ॥ १०.१९ ॥[1]

अरिष्टलक्षणम् (५)

कर्णहीनं यदात्मानं पश्यत्यात्मा कथञ्चन ।

न स जीवति लोकेऽस्मिन् कालेन कवलीकृतः ॥ १०.२० ॥

अरिष्टलक्षणम् (६)

रात्रौ दाहो भवेद्यस्य दिवा शीतं च जायते ।

कफपूरितकण्ठस्य मृत्युश्चैव न संशयः ॥ १०.२१ ॥

अरिष्टलक्षणम् (७)

चरणौ शीतलौ यस्य शीतलं नाभिमण्डलम् ।

शिरस्तापो भवेद्यस्य तस्य मृत्युर्न संशयः ॥ १०.२२ ॥

अरिष्टलक्षणम् (८)

हुङ्कारः शीतलो यस्य फुत्कारो वह्निसन्निभः ।

सदा दाहो भवेद्यस्य तस्य मृत्युर्न संशयः ॥ १०.२३ ॥

अरिष्टलक्षणम् (९)

अरुन्धतीं ध्रुवं चैव विष्णोस्त्रीणि पदानि च ।

[1] ख- ३.४३

हीनायुषो[1] न पश्यन्ति चतुर्थं मातृमण्डलम् ॥ १०.२४ ॥

मासारिष्टकथनम्

अरश्मिबिम्बं सूर्यस्य वह्नेश्चैवांशुवर्जितम् ।

दृष्ट्वैकादशमासास्तु[2] नरश्चोर्ध्वं न जीवति ॥ १०.२५ ॥

वातं मूत्रं पुरीषं यः सुवर्णं रजतं तथा ।

प्रत्यक्षमथवा स्वप्ने दशमासं न जीवति ॥ १०.२६ ॥

क्वचित्पश्यति[3] यो दीप्तं स्वर्णवत्काननं नरः ।

विरूपाणि च भूतानि नवमासं न जीवति ॥ १०.२७ ॥

स्थूलाङ्गोऽपि कृशः कृशोऽपि सहसा स्थूलत्वमालम्बते

श्यामो वा कनकप्रभो यदि भवेद्गौरोऽपि कृष्णच्छविः ।

धीरो धीरतयार्थधर्मनिपुणः शान्तोपकारी पुमा-

नित्येवं[4] प्रकृते तु शान्तचलनं मास्यष्टमे मृत्युदम् ॥१०.२८ ॥

पीडा भवेत्पाणितले च जिह्वामूलं

समूलं रुधिरं च कृष्णम् ।

---

[1] क- हीनायुधो......अपपाठः ।

[2] ख-...मासांस्तु ।

[3] ग- प्रश्यति......अपपाठः ।

[4] ग- पुमान्नित्येवं ।

वृद्धिं नरः कामपि यन्न दृष्ट्वा

जीवेन्मनुष्यः स हि सप्तमासान् ॥ १०.२९ ॥

मध्याङ्गुलीनां त्रितयं विरक्तं

रोगं विना शुष्यति यस्य कण्ठः ।

मुहुर्मुहुः प्रस्रवणं च जाड्यं

षष्ठे च मासे प्रलयं प्रयाति ॥ १०.३० ॥

यस्य न स्फुरणं किंचिद्विद्यते यस्य कर्मणि ।

सोऽवश्यं पञ्चमे मासि स्कन्धारूढो गमिष्यति ॥ १०.३१ ॥

यस्य न स्फुरते ज्योतिः पीडिते नयनद्वये ।

मरणं तस्य निर्दिष्टं चतुर्थे मासि निश्चितम् ॥ १०.३२ ॥

स्पन्दते वृषणो यस्य न किंचिदपि पीडितः ।

तृतीये मासि सोऽवश्यं यमलोके गमिष्यति ॥ १०.३३ ॥

तारा दिवा चन्द्रप्रभं निशान्ते

यो विद्युतं पश्यति चैव श्वभ्रे ।

इन्द्रायुधं वा स्वयमेव रात्रौ

मासद्वये तस्य वदन्ति नाशम् ॥ १०.३४ ॥

यस्य जानुगतं मर्म न किञ्चिदपि चेष्टितम् ।

मासान्ते मरणं तस्य न केनापि विलम्ब्यते ॥ १०.३५ ॥

दिनारिष्टकथनम्

कनिष्ठाङ्गुलिपर्व स्यात्कृष्णं च मध्यमं यदा ।

गतायुः प्रोच्यते पुंसामष्टादशदिनावधिः ॥ १०.३६ ॥

घृते तैले जले वापि दर्पणे यस्य दृश्यते ।

शिरोरहितमात्मानं पक्षमेकं स जीवति ॥ १०.३७ ॥

शैत्यं दध्यन्नपानानि यस्य तापकराणि च ।

शीतरश्मि भवेच्चारुहासं चाथ सुनिर्मलम् ॥ १०.३८ ॥

न वेत्ति वै चारुहितं न चोष्णं वेत्ति यो नरः ।

कालज्ञानेन सम्प्रोक्तं पक्षमेकं स जीवति ॥ १०.३९ ॥

स्नातमात्रस्य यस्यैते त्रयः शुष्यन्ति तत्क्षणात् ।

हृदयं हस्तपादौ च दशरात्रं स जीवति ॥ १०.४० ॥

नासाग्रं रसनाग्रं च चक्षुश्चैवौष्ठसम्पुटम् ।

यो न पश्येत्पुरा दृष्टं सप्तरात्रं स जीवति ॥ १०.४१ ॥

धारा बिन्दुसमा यस्य पतते च महीतले ।

सप्ताहाज्जायते मृत्युः कालज्ञानेन कथ्यते ॥ १०.४२ ॥[1]

---

[1] ख- १०.२०

छायापुरुषलक्षणम्

अथातः सम्प्रवक्ष्यामि छायापुरुषलक्षणम् ।

यस्य विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥ १०.४३ ॥

कालो दूरस्थितोऽस्यापि येनोपायेन लक्ष्यते ।

तं वदन्ति समासेन यथोद्दिष्टं शिवागमे ॥ १०.४४ ॥

एकान्ते विजने गत्वा कृत्वादित्यं स्वपृष्ठतः ।

संनिरीक्ष्य निजच्छायां कण्ठदेशसमाहिताम् ॥ १०.४५ ॥

ततश्चाकाशमीक्षेत ततः पश्यति शङ्करम् ।

ॐ ह्रीं परब्रह्मणे नमः

अष्टोत्तरशतं जप्त्वा ततो वै दृश्यते शुभम् ॥ १०.४६ ॥

शुद्धस्फटिकसंकाशं नानारूपधरं[1] हरम् ।

षण्मासाभ्यासयोगेन भूचराणां पतिर्भवेत् ॥ १०.४७ ॥

वर्षद्वयेन हे नाथ कर्ता हर्ता स्वयं प्रभुः ।

त्रिकालज्ञत्वमाप्नोति स योगी नात्र संशयः ॥ १०.४८ ॥

यत्कृताभ्यासयोगेन नास्ति किञ्चित्सुदुर्लभम् ।

---

[1] क,ग- नानारूपधरो

अरिष्टदर्शनम्

तद्रूपं कृष्णवर्णं च पश्यति व्योम्नि निर्मले ॥ १०.४९ ॥

षण्मासान्मृत्युमाप्नोति स योगी नात्र संशयः ।

पीतो व्याधिभयं रक्तो नीलो हत्यां विनिर्दिशेत् ॥ १०.५० ॥

नानावर्णे स्वरूपेऽस्मिनुद्वेगो जायते महान् ।

पादौ गुल्फं च जठरं विनाशकृशता[1] भवेत् ॥ १०.५१ ॥

अर्धवर्षेण वर्षे वा जीवन्वर्षद्वयेन न वा ।

विनाशो दक्षिणे बाहौ स्वबन्धुर्म्रियते ध्रुवम् ॥ १०.५२ ॥

वामबाहौ तथा भार्या विनश्यति न संशयः ।

शिरो दक्षिणबाहुभ्यां विनाशो मृत्युमादिशेत् ॥ १०.५३ ॥

अशिरो मासमरणं विना जङ्घे दिवा नव ।

अष्टभिः स्कन्धनाशेन छायालुप्तेन तत्क्षणात् ॥ १०.५४ ॥

छायापुरुषसाधनफलम्

तीर्थस्नानेन दानेन तपसा सुकृतेन वा ।

जपेन ज्ञानयोगेन जायते कालबन्धनम् ॥ १०.५५ ॥

रसायनं च पूर्वोक्तं गुटिका मृतजीवनी ।

---

[1] ख- विनाशं कृशता

नरैः सेव्या यथोक्तं च परं कालस्य वचनम्[1] ॥ १०.५६ ॥

रक्षणीयमतो देहं यतो धर्मादिसाधनम् ।

शरीरं नाशयन्त्येते दोषा धातुमलाश्रयाः ॥ १०.५७ ॥

उपसंहारपुष्पिका

वैद्यनाथतनूजेन शालिनाथेन धीमता ।

शास्त्रमालोक्य चाकृष्य रचिता रसमञ्जरी ॥ १०.५८ ॥

|| इति श्रीशालिनाथविरचितायां रसमञ्जर्यां कालविज्ञान-पुरुषछायाविज्ञानं नाम दशमोऽध्यायः ||

|| समाप्तोऽयं ग्रन्थः ||

[1] ग- बन्धनम्

परिशिष्टम्

१. सदोषपाठाः

अ.क्र.	पाठाः	ग्रन्थसंक्षेपः	संदर्भक्रमः
1	बिन्दुः	ग	१.१
2	भव पारदाय	ग	१.२
3	प्रबंधानारम्भते	ग	१.५
4	गृहीतुम्	क, ग	१.१०
5	मला ह्येते	क,ग	१.१७
6	कुप्यां	ख	२.२२
7	काचकुप्यां	ख	२.२४
8	अधस्थं	क,ग	२.२७
9	काचकुप्यां	क,ग	२.२८
10	च्छुद्धः	क,ग	२.४१
11	साधितोयः	ख	२.५७
12	विंद्यात्	ख	२.५८
13	कौद्रव	ख	३.२३
14	कोलत्थे	ख	३.२३
15	अष्टास्र चाष्टफलकः	ग	३.३१
16	कुर्यादुदरं	ख	३.३६
17	नाम	क, ग	३.४८
18	संदेहो	ख	३.४७
19	क्षीरमध्वाज्य	ग	३.६७
20	भेदी	क, ग	३.७८

21	सोभाञ्जन	ख	३.७४
22	दोलका	क	३.८७
23	मृताशिनि	क	४.२१
24	र र	ख	४.२८
25	तक्र	ख	५.२
26	निषेचेत्तु	क, ग	५.२
27	जारयेतारं	ख	५.२१
28	त्रिफलादष्टगुणे	क	५.५०
29	लिपेत्	अ,ब,क,ख,ग	६.४८
30	एकाहिकं	ख	६.६५
31	कुपिकां	अ,ब,क,ख,ग	६.६८,७०
32	जेपाला	ख	६.९१
33	द्विगुणो	ख	६.११८
34	भागो	ख	६.११८
35	एकाहिकं	ख	६.१३८
36	लिह्येत्	अ,क,ग	६.१६३
		ब,ख	६.१५६
37	काचकुप्यां	क, ग	६.१८६
38	कोह्लबीजकम्	ख	६.२१८
39	तिन्दुकाम्	ख	६.२२६
40	झागीक्षीरं	ख	६.२४५
41	दीपाग्ना	क, ग	६.२५०
42	बिड	क	७.१८
43	गन्धकःपेतं	क	८.५
44	तर्द्धेन	ग	८.८

45	नासिनी	ख	८.१२
46	संपिष्ट्वा	अ,ब,क,ख,ग	८.१५
47	सजपा कुसुमैः	ग	८.२६
48	नरकौधम्	ग	८.२६
49	शुण्ठी क्वाथः	ख	९.१०
50	सप्ताभिः	ग	९.३०
51	गर्मं	ग	९.४२
52	सौभञ्जनक	ख	९.५६
53	सुराचिर्तम्	ग	९.५२
54	लभेत्	अ,ब,ख	९.५७
		क, ग	९.५४
55	शतवीरा	ख	९.६२
